**DHARMASASTRA**

**ACHARYA 2nd YEAR**
**Course/Paper-8**

# PART - A

# गौतमधर्मसूत्रम् (सम्पूर्णम्)।

## *Gautamadharmasūtram (Sampūrṇam)*

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
(केन्द्रीयविश्वविद्यालयः)


**CENTER OF DISTANCE & ONLINE EDUCATION**

***(Formerly Directorate of Distance Education)***

**NATIONAL SANSKRIT UNIVERSITY :: TIRUPATI-517 507 (A.P)**

*(Ерstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)*

## धर्मसूत्रम्

सूत्रं नाम ''संक्षिप्ता भाषा संक्षिप्तीकरणं'' वा । तल्लक्षणं यथा -

''अल्पाक्षरमसंन्दिग्धं सारवत् विश्वतोमुखम्
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ।''

एवंभूतं धर्मसूत्रम् शिक्षा - निरूक्त - व्याकरणादि - षट् वेदाङ्गेषु अन्यतमं कल्पाङ्गभूतं भवति । कल्पशब्दस्यार्थो यथा सर्वलक्षणसंग्रहे -

१. मन्त्रमन्त्रार्थसामर्थ्यप्रकाशको ग्रन्थः ।
२. यज्ञपात्रानिर्माणप्रकारप्रतिपादकं शास्त्रम् ।
३. यागप्रयोगप्रतिपादकं शास्त्रमिति ।

विष्णुमित्रेण ऋग्वेदप्रतिशाख्ये कल्पशब्दस्यार्थः एवं स्पष्टीकरोति यत् ''कल्पो वेदविहितानां कर्मणामानुपूर्वकेण कल्पनाशास्त्रम्'' । कल्पसूत्रमिदं श्रौत - गृह्य - धर्म - शुल्व सूत्रभेदेन चतुर्द्धा विभक्तम् । तेषु धर्मसूत्राणां रचनाकालसम्बन्धे इदं वक्तुं शक्यते यत्

रिक्थाधिकारप्रसंगे भगवता यास्केन धर्मशास्त्रीयविषयः आलोचितः । तेन वेदस्य निर्देशनावसरे एकस्य श्लोकस्यापि उद्धरणं कृतम् । अतो ज्ञायते यत् यास्कपूर्ववर्त्तिकालेऽपि धर्मशास्त्रस्य स्थितिरासीत् । धर्मसूत्रेषु गौतमधर्मसूत्रं प्राचीनतमं भवति । यतो हि अन्यैः धर्मसूत्रकारैः गौतमधर्मसूत्रस्य उद्धरणं कृतम् । तस्य गौतमधर्मसूत्रस्य कालनिर्णये विभिन्नप्रमाणिकतथ्यानामा-लोचनापूर्वकं भगवता काणेमहोदयेन तस्य कालः ख्रीष्टजन्मतः षष्ठशताब्दीतः तृतीयशताब्दीमध्ये आसीदिति निर्णीतम् । अतः धर्मसूत्रस्य रचनाकालः ख्रीष्टपूर्वशताब्दीतः तृतीयशताब्दीमध्ये इति सर्वैः स्वीक्रियते ।

### गौतमधर्मसूत्रस्य रचयितुः परिचयः -

इदानीं समुपलब्धेषु धर्मसूत्रेषु गौतमधर्मसूत्रं प्राचीनतमं भवति । बहवः सूत्रकारा अनेन प्रभाविताः । कुमारिल्लभट्टस्य मतानुसारं गौतमधर्मसूत्रस्य सम्बन्धः सामवेदेन साकं वर्त्तते । सामवेदसम्बन्धितलाट्यायन - द्राह्यायणश्रौतसूत्रयोरस्य गौतमधर्मसूत्रस्य स्थानमस्तीति विज्ञायते । सामवेदस्य गोभिलगृह्यसूत्रं गौतमः प्रमाणरूपेण स्वीकृतम् । अतोऽस्मात् ज्ञायते यत् गृह्यधर्माणां सिद्धान्तेषु समन्वितं किमपि गौतमधर्मसूत्रमासीदिति ।

महामहोपाध्यायस्य पि.भि.काणे महाभागस्यायं तावदाशयो यद् गौतमः कस्यचित् जातिविशेषस्य नाम इति । यतो हि कठोपनिषदि यमनचिकेतः प्रसङ्गे

नचिकेता तस्य पिता च गौतमनाम्नासम्बोधितौ । छान्दोग्योपनिषदि हारिद्रुमगौतम इति कस्यचित् आचार्यस्य नाम श्रूयते । तत्रापि विभिन्नेषु ग्रन्थेषु बृद्धगौतम – बृहद्गौतमनामानि प्रसिद्धानि सन्ति । अत एव इदं वक्तुं नैव शक्यते यत् श्रौतसूत्रे निर्दिष्टो गौतम एव गौतमधर्मसूत्रकारो महर्षिः गौतम इति । धर्मशास्त्रीयग्रन्थेषु गौतमस्य नाम एतादृशं श्रूयते यद् विवदमानविषयत्वेन विभाति । कुमालभट्टेन तन्त्रवार्त्तिकग्रन्थे बहूनि सूत्राणि गौतमधर्मसूत्रग्रन्थात् उद्धृतानि ।

विश्वरूपेण स्वयाज्ञवल्क्यस्मृतिटीकायां गौतमस्य नामोल्लेखः कृतः । मेधातिथिरपि मनुस्मृतिटीकायां गौतमस्य नामोल्लेखं बहुत्र चकार ।

मिताक्षरा – स्मृतिचन्द्रिका – हेमाद्रि – माधवाचार्यादिभिः विभिन्नेषु स्थलेषु गौतमं स्मरन्ति । अपरार्कहेमाद्रिभ्यां बृद्धगौतमस्य, दत्तकमीमांसायां–बृद्धगौतम बृहद्गौतमयोर्नामोल्लेखः कृतः । वस्तुतः बृद्धगौतमस्मृतिः बृहद्गौतम नाम च धर्मसूत्रकारगौतमादनन्तरमेवागतम् । मनुस्मृतौ गौतमस्य नाम परम्परया दृश्यते ।

गौतमस्य देशविषये किमपि वक्तुं नैव शक्यते । गौतमधर्मसूत्रं सम्पूर्णभारतस्य कृते समादरणीयमासीत् । बौधायनेन निर्दिष्टं यत् दक्षिणोत्तरीयाणां समेषां कृते गौतमधर्मसूत्रं मान्यं भवति । अतः गौतमस्य तद्धर्मसूत्रस्य च प्रामाण्यं प्राधान्यञ्च धर्मशास्त्रजगति तदन्तर्गते धर्मसूत्रजगति च वर्त्तत इत्यत्र नास्ति कश्चित् विसंवादः ।

## गौतमधर्मसूत्रस्य प्रतिपाद्यविषयाः –

गौतमधर्मसूत्रस्य रचयिता महर्षिगौतमः । अनेन धर्मसूत्रस्य प्रवर्त्तनं कृतम् । गौतमधर्मसूत्रस्य विद्यमानासु टीकासु मस्करीटीका सर्वप्राचीना । ततः हदरत्तेन मिताक्षराटीका कृता । ततः कुलमणिमिश्रमहोदयेन सूक्ष्माटीका विरचिता । एतासु टीकासु सूक्ष्मटीकायाः महत्त्वं विद्यते । यतः अनेन टीकाकारेण मस्करीटीकायां मिताक्षराटीकायां वा यत्र यत्र विवदमानविवेचनमवलोकितम् तत्र युक्त्या वास्तविकं तत्त्वं प्रतिपादितम् ।

टीकाकारस्य हरदत्तस्य मतानुसारं गौतमधर्मसूत्रे अष्टाविंशतिअध्यायाः विद्यन्ते । कोलकातानगर्य्यां मुद्रिते ग्रन्थे कर्मविपाकः ऊनविंशाऽध्यायानन्तरमागच्छति । ग्रन्थेऽस्मिन् त्रयो प्रश्नाः विद्यन्ते । प्रथमप्रश्ने नव अध्यायाः द्वितीयप्रश्ने नव अध्यायाः तृतीयप्रश्ने दश अध्यायाः विद्यन्ते । तत्र प्रथमप्रश्ने धर्मस्य मूलं प्रमाणं प्रतिपाद्य संस्कारेषु उपनयनसंस्कारस्य विवेचनं ततः द्रव्यशुद्धिप्रकरणं शिष्यस्याध्ययनादि नियमाः प्रतिपादिताः ।

द्वितीयेऽध्याये ब्रह्मचारिधर्माः विस्तृताकारेण प्रतिपादिताः । तृतीयेऽध्याये गृहस्थाश्रमस्य वैशिष्ट्यं, यतिधर्माः वानप्रस्थधर्माश्च सम्यक् प्रतिपादिताः । चतुर्थेऽध्याये गृहस्थधर्माः विवाह-भेदाः पुत्रभेदाश्च विवेचिताः । पञ्चमेऽध्याये पञ्चमहायज्ञानां तथा मधुपर्कस्य विधानं कृतम् । षष्ठेऽध्याये अभिवादननियमाः गुरुजनानां कृते आचरणविधिश्च प्रतिपादिताः । सप्तमेऽध्याये गुरुसेवा द्विजोत्तमं प्रति सम्मानप्रदर्शनं प्रतिपाद्य, अष्टमेऽध्याये राज्ञः तथा बहुश्रुतस्य लक्षणं प्रतिपादितम् । प्रसंगेऽस्मिन् चत्वारिंशत् संस्काराणां विधानं कृत्वा आत्मगुणानां विवेचनं कृतम् । नवमेऽध्याये व्रताचरणादीनां विधानं कृतम् । एवं प्रथमप्रश्ने एते विषयाः सम्यग् विवेचिताः । वस्तुतः ग्रन्थेऽस्मिन् विषयाणां प्रतिपादनं यद्यपि क्रमवद्धतया न जातम्, तथापि विषयविवेचनप्रक्रिया सर्वथा रमणीया विद्यते ।

ततः द्वितीयप्रश्नस्य प्रथमेऽध्याये चतुर्णां वर्णानां कर्त्तव्यं विहितम् । द्वितीयेऽध्याये राज्ञः कर्त्तव्यं तथा धर्मनिर्णयप्रक्रिया प्रतिपादिता । तृतीयेऽध्याये अपराधस्य निर्णयं कृत्वा दण्डव्यवस्था प्रतिपादिता । ततः बृद्धिभेदं प्रदर्श्य ऋणादानं विवेचितम् । चतुर्थेऽध्याये विवादपदानां निर्णयं कृत्वा साक्षिव्यवस्था प्रदर्शिता । ततः व्यवहारे सत्यभाषणं न्यायानुसरणं च प्रदर्शितम् । पञ्चमेऽध्याये जन्म-मरण जनितम् अशौचं प्रतिपादितम् । षष्ठेऽध्याये परलोकगतानां पितृपुरूषाणामुद्येश्येन श्राद्धकर्म प्रतिपादितम् । सप्तमेऽध्याये वेदाध्ययनविधिं प्रतिपाद्य अनध्यायाः प्रतिपादिताः । अनध्यायप्रसंगे कुत्राध्ययनं 'न कर्त्तव्यं तत्र ये ये' संशयाः भवेयुः तेषां समाधानं विस्तृततया कृतम् । अष्टमे अध्याये भक्ष्याभक्ष्यम् प्रतिपाद्य पेयपदार्थविवेचनं कृतम् । ततः नवमेऽध्याये स्त्रीधर्माः प्रतिपादिताः । अनेन प्रकारेण द्वितीयप्रश्ने प्रोक्त विषयाणां विवेचनम् जातम् ।

तृतीयप्रश्नस्य प्रथमेऽध्याये पापानां कृते प्रार्याश्चत्तविधानं कृतम् । परन्तु प्रायश्चित्त- विवेचनात् प्राक् अनेन सूत्रकारेण प्रायश्चित्तेन पापक्षयो भवति न वेति विवेचितम् । ततः द्वितीयेऽध्याये अकृतप्रायश्चित्तानां परित्यागः सर्वथा करणीय इति प्रतिपादितम् । तृतीयेऽध्याये पातकानां वर्गीकरणं कृत्वा महापातकानां विवेचनं कृतम् । ततः चतुर्थ-अध्यायम् आरभ्य सप्तम-अध्यायं यावत् प्रायश्चित्तविवेचनं कृतम् । अत्र पापानां कृते प्रायश्चित्तविधानं गुरु-लघु-दृष्ट्या कृतम् । यथोक्तम् -

''एनः सु गुरुषु गुरूणी ।
लघुषु लघूनी इति ।।''

ततः अष्टमे – अध्याये कृच्छ्राणां व्रतानां च विधानं कृतम् । नवमे अध्याये चान्द्रायणव्रतस्य विधानं कृत्वा कामपूर्वकव्रतानुष्ठानेनपुण्य फलमपि जायते इति प्रतिपादितम् । दशमे अध्याये दायभागः प्रवर्त्तितः । एवं धर्मसूत्रकारेण महर्षिणा गौतमेन विषयाणां विवेचनं यथा कृतम् । तथा संक्षेपेण प्रतिपादितविषयाणामुपस्थापनम् अत्र जातम् ।

❖❖❖

# UNIT - I
# प्रथमप्रश्नस्य प्रथमाध्यायात् षष्ठाध्यायं यावत्

## १.०.प्रस्तावना

प्रियपाठकाः ! मानवानां हितं धर्मः इति शास्त्रवचनानुसारेण संसारेऽस्मिन् धर्मः मानवानां हितमाचरतीति सामान्यरूपेण जनानां द्रढीयान् विश्वासः विद्यते । वस्तुतः धर्मप्रधानेऽस्मिन् भारतवर्षे मनुष्यः सुखलाभाय सर्वथा यत्नशीलो भवति । परन्तु स्व स्वचिन्तानुसारेण सुखं सर्वथा सर्वदैव न प्राप्यते । तत्र किं कारणमिति जिज्ञासायाम् उत्तरं भवति – मनुष्यः संसारेऽस्मिन् यत् सुखं दुःखं वा अनुभवति तत् कर्मानुसारमिति । अत एव पुण्येन कर्मणा पुण्यं पापेन कर्मणा पापं भवति इति कथितमस्ति । एतदर्थं पुण्यापुण्ययोः धर्माधर्मयोः विवेचनार्थं यत् शास्त्रं व्यरचि महर्षिभिः, तत् धर्मशास्त्रनाम्ना विश्रुतम् । अस्मिन् खण्डे को नाम धर्मः किम् वा तस्य प्रमाणम् इति प्रतिपाद्य धर्मशास्त्रस्य स्वरुपं विकल्पव्यवस्था उपनीतधर्माः अनुपनीतधर्माः प्रतिपादिताः । तत्रापि शास्त्रेषु धर्मशास्त्रस्य महत्त्वं प्रतिपाद्य ब्रह्मचारिणमध्ययनविधिः शिष्यशासनप्रकारश्च प्रतिपादितः । मानवसमाजस्य संरक्षणाय धर्मशास्त्रस्य महती भूमिका विद्यते । तत्र विवेचितेषु विषयेषु वर्णाश्रमव्यवस्थायाः वैशिष्ट्यप्रतिपादनपूर्वकं तत्र ये ये विषयाः विचारपरिसंरमागच्छन्ति तेषामपि विवेचनमस्मिन् खण्डे जातम् । वर्णाश्चत्वारः । तेषां कृते वर्णधर्मान् प्रतिपाद्य, गौतमेन आश्रमधर्माः विहिताः । आश्रमाश्चत्त्वारः, तेषु ब्रह्मचर्याश्रमविषयः प्रतिपादितः । अवशिष्टानां गृहस्थवानप्रस्थ – सन्न्यासधर्माणां विधानम् अस्मिन् खण्डे कृतम् । विशेषरूपेण गृहस्थस्य वैशिष्ट्य प्रतिपादनपुरःसरं तत्र यानि यानि कर्त्तव्यानि च विद्यन्ते तेषां सम्यग् विवरणं खण्डेऽस्मिन् कृतम् ।

## १.१.उद्देश्यकथनम्

प्रियपाठकाः ! अस्मिन् खण्डे भवन्तः अधोनिर्द्दिष्टान् विन्दून् आलोचयिष्यन्ति ।

- धर्मशब्दस्य कोऽर्थः पठितुं शक्नुवन्ति ।
- धर्मे प्रमाणानि आलोचयिष्यन्ति ।
- किं नाम धर्मशास्त्रमिति निरूपयितुं प्रभवन्ति ।
- विकल्पव्यवस्थां स्पष्टयितुम् अर्हन्ति ।

- वर्णानामुपनयनकालान् ज्ञातुं प्रभवन्ति ।
- ब्रह्मचारिणां दण्डधारणनियमान् निर्णेतुं शक्नुवन्ति ।
- द्रव्यशुद्धिप्रकारं प्रदर्शयितुं समर्थाः भवन्ति ।
- ब्रह्मचारिणाम् अध्ययनविधिं ज्ञातुं प्रभवन्ति ।
- अनुपनीतधर्मान् ज्ञातुं प्रभवन्ति ।
- ब्रह्मचारिधर्मान् प्रतिपादयितुम् अर्हन्ति ।
- शिष्यशासनप्रकारं ज्ञातुं शक्नुवन्ति ।
- आश्रमशब्दस्यार्थं ज्ञातुं प्रभवन्ति ।
- आश्रमभेदान् विचारयिष्यन्ति ।
- वानप्रस्थधर्मान् निरूपयिष्यन्ति ।
- सन्यासधर्मान् आलोचयिष्यन्ति ।
- गृहस्थधर्मान् ज्ञातुं प्रभाविष्यन्ति ।
- विवाहभेदान् निर्णेतुं शक्नुवन्ति ।
- के अनुलोमजाः इति विचारयिष्यन्ति ।
- के प्रतिलोमजाः इति निरूपयिष्यन्ति ।
- गृहस्थकर्माणि पञ्चमहायज्ञान् च आलोचयिष्यन्ति ।
- दानफलं - दानापवादश्च ज्ञातुं प्रभवन्ति ।
- मधुपर्कविधिमतिथिस्वरूपञ्च प्रतिपादयितुं शक्नुवन्ति ।

## १.२.धर्मशब्दस्यार्थः

भारतीयपरम्परायां धर्मशब्दस्याद्भूत विकाशो जातः । समाजे यत् करणीयं यच्चोचरणीयं तत्सर्वं धर्मत्वेनावगम्यते । अयमेव धर्मो विश्वस्य धारकः लोकानाञ्च पालको भवति । अर्थात् धर्मो भवति धारकः जगद् भवति धार्यम् धारकाभावे नाम धर्माभावे धार्यस्य नाम जगतः स्थितिः सुदृढा न भवति । अतः धारकत्वेनैव धर्मस्य ख्यातिरतीव महनीया ।

धर्मशब्दस्य व्युत्पत्तिरेवं प्रकारेण कर्त्तुं शक्यते -

ध्रियते लोक अनेन इति धर्मः ।

धरति धारयति वा लोकान् इति धर्मः ।

ध्रियते लोकयात्रानिर्वाहार्थम् इति वा धर्मः ।

अस्यैव धर्मशब्दस्य अनेके अर्थाः सन्ति । धारणं पालनं, कर्त्तव्यम्, पोषणं, तपः, अध्ययनश्चेत्यादि । अमरकोषेऽस्य अनेके पर्यायवाचिनः शब्दाः प्राप्यन्ते । यथा - धर्मः, श्रेयः, पुण्यं, सुकृतं, वृषश्चेति ।

| **बोधप्रश्नाः** |
|---|
| १. धर्मशब्दस्य कोऽर्थः ? |
| |
| |
| २. धर्मशब्दस्य का व्युत्पत्तिः ? |
| |
| |
| ३. धर्मशब्दस्य पर्यायवाचिन शब्दाः के ? |
| |
| |
| ४. धर्मेण प्रवृत्तिं लभमानः नरः इह परत्र च किं प्राप्नोति ? |
| |
| |

## १.३.धर्मे प्रमाणानि

धर्मस्य किं मानमिति शंकायामुच्यते । श्रुतिः स्मृतिः आचारणश्च धर्मे प्रमाणमिति गौतमेन प्रतिपादितम् । मनुना वेदः स्मृतिः सदाचारः आत्मतुष्टिश्च धर्मप्रमाणरूपेण प्रतिपादितम् । अत्र सर्वोऽपि वेदो धर्ममूलमिति गौतमस्य अभिमतम् । स्मृतिपदेन धर्मशास्त्रस्य ग्रहणं भवति । यतः मनुना ''धर्मशास्त्रं तु वै स्मृतिरिति'' कथितत्वात् । स्मृतयश्च मनुगौतमादिप्रणीताश्चाष्टादश- उपस्मृतयश्च नचिकेतस्कन्दकाश्यपादि प्रणीताश्चाष्टादशेति अध्येतृपरम्पराप्रसिद्धाः । शीलं च स्वभावः आचरणमित्यर्थः । आचरणमपि तात्कालिकपुरातनभेदेन द्विधा भिद्यते । तात्कालिकं तु सदाचारः । पुरातनं तु ग्रन्थाद्युपनिबद्धम् । तदेव शीलमिति मनोरभिप्रायः ।

शीलस्य आचरणरूपस्य प्रामाण्ये क्वचित् महतामपि धर्मव्यतिक्रमो धर्मलंघनं दृष्टः पुराणादिभ्यो ज्ञातश्च। साहसं-बलकृतमपि कर्म दृष्टम् । विषयासक्त्या कृतं धर्मलंघनं धर्मव्यतिक्रमः, कोपकृतं तु साहसम् इति कथ्यते । तच्च अर्वाचीनैः प्रमाणरूपेण नादरणीयम् अपितु साहसरूपेण वर्जनीयमेव इति गौतमस्याभिप्रायः ।

| **बोधप्रश्नाः** |
|---|
| १. स्मृतेरपरं नाम किम् ? |
| |
| |
| २. गौतममते धर्मे कानि प्रमाणानि ? |
| |
| |
| ३. महतामाचरणं धर्मे प्रमाणं स्यात् न वा ? |
| |
| |
| ४. महतां धर्मव्यतिक्रमः अर्वाचीनैः ग्राह्यो न वा ? |
| |
| |

## १.४.धर्मशास्त्रस्य स्वरूपम्

धर्मशास्त्रमिदं सर्वप्राचीनतममार्ययुष्टं च शास्त्रं भवति । भारतवर्षे भारतीयसंस्कृतेश्च संरक्षणाय धर्मशास्त्रस्य प्रादुर्भावः सञ्जातः । देशकालमधिकृत्य धर्मशास्त्रविद्भिरस्य श्रेणीविभागः परिकल्पितः । इदं तावद्धर्मशास्त्रं भागचतुष्टयेन विभक्तम् । यथा - स्मृतिसाहित्यम्, सूत्रसाहित्यम्, भाष्यसाहित्यम्, निबन्धसाहित्यश्चेति ।

धर्मस्योपादेयत्वं स्मृतेः प्राधान्यमर्हति । स्मृतिः धर्मस्योपादानं भवति । ''श्रुतिस्तु वेदविज्ञेयो धर्मशास्त्रं तु वै स्मृतिः ।'' स च स्मृतिशब्दः पङ्कजादिवत् योगरूढ एव । श्रुत्यनुमापकत्वेनास्य प्रामाण्यमङ्गीक्रियते । स्मृतिग्रन्थेषु मनुस्मृतिः

सर्वप्राचीना इति स्मृतिकाराणां मतम् । ऋग्वेदे मनुः समग्रमानवजातेः पिता इति वर्णितोऽस्ति । मनुना प्रदर्शितः मार्गः नैव अनादरणीयः इति विदुषां मतम् । ''मनुर्वै यत् किञ्चिदवदत् तद्भेषजं भेषजतायाः'' इति तैतिरीयसंहितायां ताण्ड्यब्राह्मणे वर्णितमस्ति । अपि च –

वेदार्थोपनिबद्धत्वात्प्राधान्यं हि मनोः स्मृतम् ।
मन्वर्थविपरीता तु या स्मृतिः सा न शस्यते ।।
यावच्छास्त्राणि शोभन्ते तर्कव्याकरणानि च ।
धर्मार्थमोक्षोपदेष्टा मन्वर्थवन्न दृश्यते ।। इति ।

## बोधप्रश्नाः

| |
|---|
| १. किं नाम धर्मशास्त्रम् ? |
| |
| |
| २. धर्मशास्त्रस्य प्रवर्त्तकः कः ? |
| |
| |
| ३. धर्मसूत्रस्य प्रवर्त्तकः कः ? |
| |
| |

## १.५.विकल्पः

विविधः कल्पः विकल्पः । यत्र वेदयोः स्मृत्योः शीलयो र्वा विरोधस्तत्र उभयपक्ष-योरेकतरएव पक्ष आदरणीयः । यतः उभयोरपि धर्मत्वात् । यथा – उदिते होतव्यम्, अनुदिते होतव्यम्, समयाध्युषिते होतव्यम्, इत्यादि तुल्यबलयोः श्रुत्योर्विरोधः जातः । तत्र विकल्पे प्राप्ते शाखाभेदेन एकस्यैव पक्षस्यादरः कर्त्तव्यः । स्मृतावपि ब्राह्मणब्रह्मचारिणः दण्डग्रहणविधौ वैल्वपालाशो वा दण्डः, क्षत्रियस्य वारोखादित वा इति विकल्पेन प्राप्तौ एकस्यैवदण्डस्य धारणं कर्त्तव्यमेव । तथा च

सदाचारप्रसङ्गेऽपि दक्षिणदेशे मातुलकन्यापरिणयनं भवति । एवमेव सदाचारयोर्विरोधे यथा – अनुपनीतेन सह भोजनमभोजनं चेति देशभेदेन विकल्पः स्वीकरणीयः ।

तुल्यवलविचारप्रसङ्गे अतुल्यवलविचारोऽपि आगच्छति, अतुल्यवले नाम असमानवले पूर्वस्य प्रावल्यम्, उत्तरस्य दौर्वल्यम् । यथा – ''औदुम्बरीं स्पृशन् गायेदिति'' श्रुतिवचनं औद्रम्बरी सर्वा वेष्टयितव्या इति स्मृत्या वाधितं भवति । अत्र वलवत्या श्रुत्या दुर्वला सर्ववेष्टनात्मिका स्मृतिः वाधिता भवति । अतः श्रुतिवचनं ग्राह्यम् । स्मृतिः देशाचारयोर्मध्ये विरोधे जाते स्मृतिः ग्रहणयोग्या भवति । यथा – दक्षिणदेशे मातुलकन्यापरिणयः देशाचारत्वेन स्वीकृतः । परन्तु ''मातुलस्य सुतामुद्वा मातृमात्रां तथैव च'' इतिस्मृतिवचनेन मातुलकन्यापरिणयनिषेधः स्मृतिसिद्धः । अत एव अनयोर्विरोधे वलवत्या स्मृत्या आचारो बाध्यत इति ।

**बोधप्रश्नाः**

| |
|---|
| १. विकल्पः कुत्र स्वीक्रियते ? |
| |
| |
| २. अतुल्यवले विकल्पः स्वीक्रियते न वा ? |
| |
| |
| ३. ''विकल्पः'' इत्यत्र का व्युत्पत्तिः ? |
| |
| |

## १.६.वर्णानामुपनयनकालाः, उपनीतधर्माश्च

आचार्यस्य समीपे वेदाध्ययनादिनिमित्तं स्वपित्रादिभिः बालकस्य नयनं उपनयनमिति कथ्यते । प्राचीनकालादारभ्य अस्य संस्कारस्य प्रवर्त्तनं जातम् । संस्कारस्य प्रमुखमुद्देश्यं ब्रह्मचर्यपालनम् । वैदिककाले शिष्यस्य संज्ञा ब्रह्मचारी, अध्यापकस्य संज्ञा आचार्य्य इति ज्ञायते । उपनयनसंस्कारेण संस्कृतस्य ब्रह्मचारिणः कृते केचन नियमाः गौतमेन प्रतिपादिताः । ब्रह्मचारी गुरुगृहे तिष्ठनध्ययनेन साकं कायिकसेवामपि करोति । यथा श्वेतकेतुना द्वादशवर्षादारभ्य चतुर्विंशतिवर्षं

यावदध्ययनं कृतम् । तत्र तेन शाारीरिकश्रमः स्वीकृतः । संस्कारेण संस्कृतः मनुष्यः स्वकीयं लक्ष्यं साधयितुं शक्नोति । यतः संस्कारं विना कर्म निष्फलं भवति इति ज्ञायते । वर्णानां कृते गौतमेन उपनयनकालाः प्रदिपादिताः यथा ब्राह्मणः गर्भादष्टमे वर्षे वयसि, क्षत्रियः एकादशवर्षे वयसि, तथा वैश्यः द्वादशवर्षे वयसि उपनयनसंस्कारेण संस्कृतो भवेत् । गौतमेन वर्षगणनाविषये कथितं यत् गर्भप्रभृति वर्षगणना कर्त्तव्येति । मनुनाऽपि एतदेव कथितम् । उपनयनस्य कृते काम्यकालाः विद्यन्ते यथा -

ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे ।
राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे ।।

परन्तु गौतमेन नवमे पञ्चमे वा काम्यमिति पुरस्कृत्य स्पष्टीकृतम् यत् - गर्भनवमवर्षे अथवा गर्भपञ्चवर्षे वुद्धिस्वास्थ्याद्यपेक्षया उपनयनं कार्यम् । अत एव अनेन ज्ञायते यत् गौतमेन गर्भ- नवमवर्षे गर्भ-पञ्चमवर्षे वा काम्योपनयनकालः ब्राह्मणस्य कृते प्रकल्पितः इति । उपनयनेन त्रयः वर्णाः द्विजातिपदवाच्याः भवन्ति । गौतममतानुसारम् उपनयनाख्यं द्वितीयं जन्म यस्मात् पुरुषात् भवति स आचार्य्यपदवाच्योभवति ।

| **बोधप्रश्नाः** |
|---|
| १. ब्राह्मणस्योपनयनकालः कः ? |
| |
| |
| २. क्षत्रियस्य कः उपनयन कालः ? |
| |
| ३. संस्कारस्य उद्देश्यं किम् ? |
| |
| |
| ४. काम्योपनयनकालाः के ? |
| |
| |
| ५. के द्विजातयः ? |
| |
| |

## १.७.द्रव्यशुद्धिः

द्रव्याणां तैजसादीनामशुद्धानां शुद्धिः अर्थात् दुष्टत्वनिराकरणं कथं कर्त्तव्यमिति जिज्ञासायां गौतमेन द्रव्यशुद्धिः प्रदिपादिता । यथा परिमार्जन-प्रदाह-तक्षण-निर्णेजनानि तैजस-मार्त्तिक-दारव-तान्तवानाम् इत्यादि । अत्र तैजसपात्राणां शुद्धिः परितः मार्जनादिभिः कर्मभिः जायते । अत्र तैजसपदेन सुवर्ण-रजत-ताम्र-कांस्यादि-निर्मितानां पात्राणां ग्रहणं भवति । ततः मृत्घटितानां पात्राणां शुद्धिः प्रदाहेन अर्थात् प्रकृष्टदाहेन भवति इति ज्ञायते । ततः काष्ठघटितानां पात्राणां शुद्धिः तक्षणेन भवति । तन्तुनिर्मितानां वस्त्रादीनां शुद्धिः प्रक्षालनेन भवति । तथैव प्रस्तरमयानां रत्नघटितानां शंखमुक्ता प्रभृतीनां शुद्धिः तैजसवत् परिमार्जनेन भवति । अस्थि-भूम्योः शुद्धिः तक्षणेन भवति । तथा च गजदन्त – शृङ्गादि निर्मितानि द्रव्याणि तक्षणेन भवति । भुवः शुद्धिः खननेन आवपनेन वा भवति । रज्जु-विदलादि-घटितानां पात्राणां तथा चर्म-निर्मितानां द्रव्याणां शुद्धिः जलेन क्षालनं कृत्वा भवति । परन्तु मद्यमूत्रपुरीषादिभिः संस्पृष्टानां द्रव्याणां त्यागः सर्वथा विधीयते । यदि शोधयितुं न शक्यते चेत् । एवं गौतमेन द्रव्यशुद्धिविषये सम्यग् विचारः कृतः । द्रव्यशुद्धिप्रसङ्गे गौतमेन स्नानप्राणायादिभिः शरीरशुद्धिः तत्रैव प्रतिपादिता ।

| **बोधप्रश्नाः** |
|---|
| १. तैजसद्रव्याणां शुद्धिः केन भवति ? |
| |
| २. भुवः शुद्धिः कथं भवति ? |
| |
| ३. उपल इति शब्दस्य कोऽर्थः ? |
| |
| |
| ४. मृण्मयानां शुद्धिः केन भवति ? |
| |
| ५. अत्यन्तोपहतं द्रव्यं व्यवहारयोग्यं भवति न वा ? |
| |
| |

## १.८.ब्रह्मचारिणामध्ययनविधिः

प्राचीनकाले उपनयनसंस्कारेण संस्कृतः द्विजः गुरुग्रहे उषित्वा विद्याध्ययनं कुर्वन्ति स्म । तदा शिष्यः स्वऽदक्षिणेन पाणिना गुरोः वामं पादं अङ्गुलिप्रदेशे गृहीत्वा अधीहि भोः इति गुरुम् आमन्त्रयेत् तत्र अध्ययनकाले गुरौ चक्षुः मनः सर्वथा देयम् । अत एव गौतमेन स्पष्टतया प्रतिपादितं यत् शिष्यः अध्ययनात् प्राक् प्राणोपस्पर्शनम् दर्भैः कृत्वा चक्षोः तथा मनः गुरौ संस्थापयेत् इति । कथमिति चेत् उच्यते यत् अन्यमनस्केन शिष्येण विद्या सुचारुरूपेण ग्रहीतुं न शक्यते । अतः मनोनिवेशपूर्वकम् अध्ययनं कर्त्तव्यमिति ब्रह्मचारिणां कृते उपदिष्टम् । अत्र चक्षुः दानस्य किं कारणमिति जिज्ञासायां सूक्ष्माटीकाकारेण स्पष्टीकृतं यत् हस्तस्वरादिग्रहणार्थं गुरौ चक्षुर्दानं कर्त्तव्यम् । मनोदानेन नेत्रदानेन श्रवणेन च विद्यां सम्यग्रूपेण ग्रहीतुं शक्यते । ब्रह्मचारी प्राणोपस्पर्शनानन्तरं प्राणानामभिवृद्ध्यर्थं त्रीन् प्राणायामाननुतिष्ठेत् । प्राणायामानुष्ठानेन आयुः वृद्धिः जायते । पुरककुम्भकरेचकानां समुदायेन एकः प्राणायामो भवति । तादृशाः त्रयः कार्याः । ते पञ्चदशमात्राः । एवं पञ्चदशमात्राभिः एकः अधमप्राणायाम इति कथ्यते । ब्रह्मचारी अध्ययनकाले प्रागग्रेषु कुशेषु उपविशेत्। अध्ययनप्रारम्भात् प्राक् प्रणबोच्चारणं कुर्यात् । अत्र ओं भूः इत्यारभ्य ओं सत्यं यावत्। पञ्चव्याहृतीनाम् उच्चारणम् कृत्वा ततः अध्ययनं कुर्यात् । प्रत्यहं प्रातः गुरोः पादोपसंग्रहणं कृत्वा अध्ययनं कुर्यात् । पादोपसंग्रहणमपि यथाविधि कर्त्तव्यम् । वेदाध्ययनात् प्राक् अन्ते च गुरोः पादोपसंग्रहणं ब्रह्मचारिणा कर्त्तव्यम् । गुरुमुखात् वाक्यानि श्रुत्वा शिष्यः अनुवाचनं कुर्यात् । अध्ययनारम्भे गुरोः पादोपसंग्रहणानन्तरं शिष्यः गुरोर्दक्षिणहस्त-पार्श्वे प्राङ्मुखः उदङ्मुखो वा उपविशेत् । गुरोः सकाशात् वेदग्रहणस्य आदौ अन्ते च सावित्री- मन्त्रस्य उच्चारणं कुर्यात् । यथा तत् सवितुरित्यादि । अध्ययनावसरे गुरुशिष्ययोरन्तरा यदि श्वनकुलादीनां प्रवेशः स्यात्, तर्हि गुरु शिष्ययोः विप्रवासः कथितः तथा च ब्रह्मचारी तस्मिन् दिने उपवासमपि कुर्यात् । नकुलादिभिन्नानां पश्वादीनाम् अन्तरागमने शिष्यः घृतप्राशनं कुर्यात् । तत्र त्रयः प्राणायामाः शिष्येण कर्त्तव्याः, एवञ्च श्मशानादिषु अध्ययनेऽपि पूर्वोक्तनियमानुसारेण उपवासादिकं कर्त्तव्यमिति ।

| **बोधप्रश्नाः** |
|---|
| १. अध्ययनावसरे शिष्येण चक्षुः मनः कुत्र देयम् ? |
| |
| |
| २. गुरोः पादोपसंग्रहणं कदा कर्त्तव्यम् ? |
| |
| |
| ३. गुरूशिष्ययोर्मध्ये नकुलप्रवेशे किं कर्त्तव्यम् ? |
| |
| |
| ४. ब्रह्मचारी कति प्राणायामानाचरेत् ? |
| |
| |

## १.८.अनुपनीतधर्माः

उपनयनात् प्राक् ब्राह्मणक्षत्रियवैश्यबालकानां कृते अस्नानभोजनादि, स्वेच्छाभाषणादि, लशुनपर्युषितभक्षणादि दोषाय न भवति इति गौतमेन कथितम् । एतेन तस्य कामचारादि नियमविधिरूपेण नोपदिश्यते । अत्र यथा यथा शिशोः वयोवस्थाबृद्धिः तथा तथा आचराणादौ दृढता अवलम्बनीया । प्रसङ्गेऽस्मिन् सूक्ष्माटीकाकारेण इदमपि कथितं यद् ब्रह्महत्यादि मृषाभाषणं, येन अनृतादिना अन्यस्य प्राणक्षयः तादृशं वचनं, सुरापानादि च दोषाय दण्डाय च भवत्येव । अपुपनीतस्य कृते यद्यपि कामाचार–कामभक्षणादि गौतमेन प्रत्यपादि तथापि तत्र इदमपि उपदिष्टं यत् अनुपनीतः हुतशेषं पुरोडाशादिभक्षणं न कुर्यात् । तथा च कामाचारत्वेन स्त्रीप्रसङ्गादिकमपि न कुर्यात् । अनुपनीतस्य कृते आचमनविधिः नैव कल्पितः । परन्तु प्रधावनं अङ्गादीनां जलेन क्षालनं सर्वथा कर्त्तव्यमेव । यतः अमेध्योच्छिष्टादिभिः ग्रस्तः अनुपनीतः स्वस्य शुद्ध्यर्थं लिप्तस्य अङ्गस्य क्षालनं जलादिना कुर्यात् ।

| **बोधप्रश्नाः** |
|---|
| १. कस्य कृते कामचारः गौतमेन कथितः ? |
| |
| |
| २. हुतशेषं कः न अश्नीयात् ? |
| |
| |
| ३. अनुपनीतस्य आचमनविधिः विद्यते न वा ? |
| |
| |

## १.९.ब्रह्मचारिधर्माः

गौतमेन उपनयनसंस्कारेण संस्कृतानां ब्रह्मचारिणां कृते केचन धर्माः विधिनिषेधमुखेन प्रतिपादिताः । ब्राह्मण-क्षत्रिय-वैश्य-ब्रह्मचारिणां कृते गौतमेन मेखलाधारणं विहितम् । तत्र ब्राह्मणब्रह्मचारी दर्भविशेषेण निर्मितां मेखलां धारयेत् । क्षत्रियब्रह्मचारी धनुर्ज्यां मेखलात्वेन गृह्णीयात् । वैश्यब्रह्मचारी-शणसूत्रमयीं मेखलां धारयेदिति । अत्र गौतमेन कथितम् यत् - 'मौञ्जी ज्या - मौर्वीसौत्र्यो मेखलाः ब्राह्मणादिब्रह्मचारिणः क्रमानुसारं मेखलारूपेण (कटिबन्धनसूत्राणि) धारयेयुरिति ।' ततः ब्रह्मचारिणाम् उत्तरीयधारणप्रसंगेऽपि गौतमेन कथितं यत् कृष्णसारमृगचर्म ब्राह्मणः, शम्बराख्यमृगचर्म क्षत्रियः, छागचर्म वैश्यश्च उत्तरीयरूपेण धारयेयुः । ब्रह्मणचारिणां वस्त्रधारणप्रसङ्गेऽपि कथितम्, यत् - शणसूत्रर्निमितम्, क्षुमा-अतस्तीतद्विकारः क्षौमं वस्त्रं, दर्भादिनिर्मितं वस्त्रं, पर्वतीयछागरोमनिर्मितं कम्बलवस्त्रञ्च ब्राह्मणादिब्रह्मचारिणां वासांसि परिधानीयानि भवन्ति । अत्र क्रमविवक्षा नास्ति । अथवा-अविकृतमर्थात् कुसुमरागादिविकाररहितं कार्पाससूत्रनिर्मित्तं वस्त्रं ब्रह्मचाररिभिः ग्राह्यम् । अत्र गौतमेन वृक्षादिकषायेण रक्तवर्णमपि वस्त्रं ब्रह्मचारिधार्यमिति मतानन्तरमुपन्यस्तम् । ब्रह्मचारिधर्मप्रतिपादनप्रसङ्गे गौतमेन ब्रह्मचारिणां दण्डधारणनियमः कथितः । यथा - विल्ववृक्षस्य शाखा अथवा पलाशवृक्षस्य शाखा ब्राह्मणब्रह्मचारी दण्डत्वेन धारणं कुर्यात् । अश्वत्थशाखां क्षत्रियः, पिलोः शाखां वैश्यश्च दण्डरूपेण धारयेताम् । अथवा उपरि निर्दिष्टानां

दण्डानामलाभे यज्ञियो उदुम्वरवृक्षशाखां सर्वे ब्रह्मचारिणः दण्डरूपेणधारयेयुः । तत्रापि दण्डाः कीटादिदोषरहिताः यूपवदग्रे वक्राः सत्वचः सौम्यदर्शनाः भवेयुः । ब्राह्मणादि-ब्रह्मचारिणः क्रमेण मूर्द्धललाटनासाग्रपर्यन्ताः दण्डाः धारयेयुः । देशकालशौचविधिमाश्रित्य ब्रह्मचारी शौचमाचरेत् । ब्रह्मचारी-आचार्य-तत्पुत्रस्त्रीदीक्षितनामानि नोच्चारयेत् । अश्लीलाः वाचः मद्यं च नित्यं ब्राह्मणः वर्जयेदिति गौतमेन सुस्पष्टमभिहितम् । शय्यासनाशनादिषु संयतो भवेत् । अभिवादनकाले सम्यगानतो नामगोत्रे चोच्चार्य्यभिवादनं कुर्यात् । प्रतिश्रवणञ्च गुरो समीपगमनपूर्वकम् ओंकारादिशब्दरूपव्यवहारेण च कुर्यात् । भैक्ष्यमादाय ब्रह्मचारिगुरवे निवेद्य तदभावे वा तद्भार्यायै, गुरोः पुत्राय, तदभावे स ब्रह्मचारिणे निवेद्य तदनुमत्या भुञ्जीत । स्त्रीणां प्रकर्षेण अवयवशो निरीक्षणं निरूपणं वा ब्रह्मचारी वर्जयेत् । न तु यादृच्छिकं दर्शनम् । एवमेव ब्रह्मचारी एकस्य वेदस्य कृते द्वादशवर्षाणि अथवा यथासामर्थ्यं वेदविद्यां गृहीत्वा गुरवे दक्षिणां दत्त्वा अथवा तदनुमत्या स्नातकव्रतं प्रपाल्यगृह्यं प्रत्यागच्छेत् । तथा च स्त्रीणामकारणम् अर्थात् कूपपतितादीनामुद्धारादिकं विहाय नान्यत्र अकालेऽपि उद्देश्यपूर्वकं स्पर्शनं न कर्त्तव्यं ब्रह्मचारिणा । द्यूतं हीनसेवामदत्तादानं हिंसां च वर्जयेत् ।

उपनयनसंस्कारेण संस्कृतः ब्रह्मचारी गुरुगृहे स्थित्वा विद्याध्ययनं कुर्यात् । अत्र ब्रह्मपदेन वेद इति अर्थः बोध्यते । धर्मशास्त्रे ब्रह्मचारी नैष्ठिक-उपकुर्वाणभेदेन द्विविधः, यः वेदस्य वेदयोः वेदानां वा अध्ययनं यथाशक्ति कृत्वा गुरवे दक्षिणां दत्त्वा अथवा तदनुमतिं प्राप्य स्नातकव्रतं प्रपाल्य गृहं प्रत्यागच्छति सः उपकुर्वाणब्रह्मचारीति कथ्यते । यः आजीवनं गुरोः सविधेः तिष्ठन् ज्ञानमधिगच्छति, स नैष्ठिकब्रह्मचारीति कथ्यते । तत्र ब्रह्मचारिणः कृते केचन नियमाः पालनीयाः भवन्ति इति गौतमेन प्रत्यपादि । यथा – उपनीतः प्रत्यहं अग्नौ हवनं कुर्यात् सन्ध्याबन्दनादिकं कुर्यात् । आदित्यस्य दर्शनं न कुर्यात् । मधुमांस-गन्ध-पुष्पमाल्य-दिवाशयनं-तैलादीनां-ग्रहणम्-अञ्जनधारणं शकटाद्यारोहणम् इत्यादीनि वर्जयेत् । तथा च कामक्रोधलोभादीनां परिहारं कुर्यात् । गीतवादनादीन् वर्जयेत् गुरुदर्शने कण्ठात् सशब्दं श्लेष्मादिनिष्कासनं न कुर्यात् । तथा च ब्रह्मचारी कण्ठप्रावरणं, उरौ पादमवस्थापनं, पादप्रसारणं प्रसारितमुखेन उच्चैः हासश्च सर्वथा वर्जयेत् ।

## १.१०.शिष्यशासनप्रकारः

प्राचीनकाले शिष्याणां कृते शासनव्यवस्था प्रचलितासीत्, परन्तु तत्र केचन नियमाः विद्यन्ते । यथा - गुरुः ताडनेन विना शिष्यस्य ब्रह्मचारिणः शासनं कुर्यात् । यदि विना ताडनं भर्त्सनादिना शासनमसम्भवं सञ्जातम् । तर्हि कृशाभ्यां रज्जु-वेणु-विदलरूपं वा यष्टिन् शासनं गुरुणा कर्त्तव्यम् । तत्रापि रज्जुवेणुविदल-भिन्नेन-अर्थात् हस्त-पदादिना दण्डादिना वा प्रहरन् गुरुः दोषभाग् भवति । न केवलं गुरुः दोषः गौतमेन कथितः, अपि तु गुरुः राज्ञा दण्डनीयो भवति । प्रसंगेऽस्मिन् मनुना-तदेव कथितम् - यथोक्तम् -

''पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कथंचन ।
अतोन्यथा तु प्रहरन् प्राप्तः स्यात् चौरकिल्विषम् ।।'' (म. स्मृ. ८/३००)

एवमेव ब्रह्मचारिणां विद्याध्ययनकाले शासनविधिः गौतमेन निरूपितः ।

| **बोधप्रश्नाः** |
|---|
| १. सर्वप्रथमतः गुरुः केन शिष्यं शासयेत् ? |
| |
| |
| २. कदा गुरुः राज्ञा दण्डनीयो भवति ? |
| |
| |
| ३. गुरुः शिष्यं केन ताडयेत् ? |
| |
| |

## १.११.आश्रमाः

आश्रमश्चतुर्विधः, यथा - ब्रह्मचर्याश्रमः, गृहस्थाश्रमः, वानप्रस्थाश्रमः, सन्न्यासाश्रमश्च । गौतमेनाश्रमग्रहणे समुच्चय प्रतिपाद्य कथितं यत् - चतुर्णाम् आश्रमाणां गृहस्थः उत्पत्तिस्थानम् । इतरेषाम् आश्रमान्तराणां सन्तानोत्पादनाभावात् । गौतमेन गृहस्थाश्रमस्य वैशिष्ट्यं विद्यत इति प्रतिपाद्य ब्रह्मचर्याश्रमानन्तरं

सूचीकटाहन्यायेन सन्न्यासाश्रमः प्रतिपादितः । सन्न्यासस्य नामान्तरं भवति – भिक्षुः यतिः परिव्राजकश्चेति । भिक्षुः द्रव्यसंग्रहरहितः स्यात् । अत्र संशयो भवति, यत् केन स जीवेदिति चेत् – तत्र उत्तरं भवति तस्य नामैव जीविकां बोधयति । अर्थात् भिक्षया जीवेदिति । स च भिक्षुः सन्यासी वा सम्पूर्णरूपेण विषय-विमुक्तो भूत्वा जितेन्द्रियो भवेत् । तथा च वर्षासु एकस्थाननिवासी भवेत् । यावता भक्षणेन जीवनं तिष्ठेत् तावत् परिमितं भोज्यं ग्रामं गत्वा भिक्षेत । अन्यदा अरण्ये एव तिष्ठेत् । सन्यासी कदाचिदपि भिक्षाग्रहणकाले अधिकभिक्षाप्राप्त्यर्थं आशीर्वादपरायणो न भवेत् । वाचि – चक्षुषि – कर्मणि च चापल्यं न प्रदर्शयेत् । यस्मात् गृहात् न लब्धम् तद् गृहं प्रति पुनः पश्चाद्गमनं न कुर्यात् । लज्जानिवारणार्थं कौपीनं धारयेत् जनैः परित्यक्तं जीर्णवस्त्रं वा शोधयित्वा धारयेत् । सन्यासी अरण्ये तिष्ठन् स्वतः शीर्णं फलादिकं गृह्णीयात् । एकस्मिन् ग्रामे एकाम् एव रात्रिं वसेत् । केवलं वर्षर्त्तौ ग्रामे मासचतुष्टयं वसेत् । सन्यासी सम्पूर्णरूपेण मुण्डनं कुर्यादथवा – शिखामात्रावशेषं केशं धारयेत् । ब्रीह्यादिवीजानां वधं वर्जयेत्, प्राणिमात्रेषु समभावापन्नः स्यात् । सन्न्यासी सर्वथा कर्ममात्रस्यारम्भं न कुर्यात् । सन्न्यासी एकाकी तिष्ठेत् । एवमेव सन्यासधर्माः गौतमेन प्रतिपादिताः ।

## १.१२.वानप्रस्थधर्माः

वने प्रकर्षेण तिष्ठतीति वनप्रस्थः, वनप्रस्थ एव वानप्रस्थः, अत्र संज्ञायां दैर्घ्यम् । विखनसा प्रोक्तेन मार्गेण वर्त्तते इति वैखानसः वानप्रस्थः इत्युच्यते । स वने वसेत्, न तु ग्रामे । मनुमतानुसारं पञ्चाशद् वर्षे वयसि पुत्रमुखं पौत्रमुखं वा दृष्ट्वा पत्नीं पुत्रे निक्षिप्य अथवा वनं जिगमिषया तया सह वनं गच्छेत् । तत्र वने तिष्ठन् फालकृष्टां – भूमिं नाधिगच्छेत्, वन्यमकृष्टोद्भवं फलं मूलं च भक्षणं कुर्यात् । वैखानसशास्त्रानुसारम् अग्निहोत्रं जुहोयात् । ग्रामोद्भवं फलादिकं नाश्नीयात् । पञ्चमहाप्रज्ञान् अनुतिष्ठेत् । आश्रमागत कश्चित् न निवर्त्तेत् । किन्तु स्तेनादिपतितान् वर्जयित्वाऽतिथिसेवा करणीया वानप्रस्थेन । वानप्रस्थः केशश्मश्रुधारीस्यात् दर्भादिनिर्मितं वासः, मृगचर्म च अन्तर्वासत्वेन उत्तरीयत्वेन च यथाक्रमं धारणं कुर्यात् । वानप्रस्थः ब्रीह्यादिशस्यं सञ्चितवान् चेत् – आश्विने मासि यदवशिष्टं तत् परित्यजेत् । अत्र गौतमेन वानप्रस्थादि-आश्रमाणां प्रतिपादनं यद्यपि कृतं तथापि प्रत्यक्षरूपेण वेदे गार्हस्थाश्रमस्य विधानात् गृहस्थाश्रमस्य महत्त्वं स्वीकृत्य पूर्वाचार्याणां मतमपि सगौरवमुद्धृतम् ।

| **बोधप्रश्नाः –** |
|---|
| १. कति आश्रमाः ? |
| |
| |
| २. आश्रमेषु कः श्रेष्ठः ? |
| |
| |
| ३. वानप्रस्थः कुत्र तिष्ठेत् ? |
| |
| |
| ४. भिक्षुरपरं नाम किम् ? |
| |
| |
| ५. वानप्रस्थः सञ्चितं धनं कदा उदसृजेत् ? |
| |
| |

## १.१३.गृहस्थधर्माः

धर्मशास्त्रे आश्रमेषु गृहस्थाश्रमस्य ज्येष्ठत्वं श्रेष्ठत्वञ्च विद्यते इति प्रतिपादितम् । गृहे भार्यायाः समीपे तिष्ठतीति गृहस्थः । लोकेऽपि प्रसिद्धिर्विद्यते यत् – ''न गृहं गृहमुच्यते गृहिणी गृहमुच्यते ।'' ब्रह्मचारी वेदविद्यामधीत्य गुरवे दक्षिणां दत्त्वा अथवा तदनुमत्या स्नातकव्रतं प्रपाल्य सजातीयां कुलरूपवित्तादिना च समां कर्मणा वाचा वा अन्यस्मै वराय न दत्ताम् अवरवयसीं कन्यां भार्यात्वेन विवाहं कुर्यात् । असमानप्रवरेण असमानगोत्रेण च सह अर्थात् वरेण सह विवाहः कार्यः । तथा च पितामह प्रपितामहक्रमेण पितुः सप्तमपुरुषपर्यन्तानां ये पितृबन्धवः तेभ्यः पितृबन्धुभ्यः सप्तमादुद्धर्वं जातां कन्यां भार्यात्वेन गृह्णीयात् । तथैव मातुलानां पुत्राः कन्याश्च मातृबन्धवः तेभ्यः पञ्चमादुद्ध्वं जाता कन्या ग्राह्या । गृहस्थधर्मप्रतिपादानावसरे विवाहभेदोऽपि गौतमेन कथितः । विवाहः अष्टविधः – यथा –

## १.१४.विवाहस्य भेदाः

गर्भाधानादारभ्य अन्त्येष्टिसंस्कारं यावत् चत्वारिंशत्संस्कारेषु विवाहोऽन्यतमः। विवाहसंस्कारे गुणाधानं भवति । धर्मशास्त्रे विवाहसंस्कारः अष्टधा विभक्तः । यथा – ब्राह्मः, दैवः, आर्षः, प्रजापत्यः, आसुरः, गान्धर्वः, राक्षसः, पैशाचश्चेति । धर्मशास्त्रकारैः उल्लिखितानामष्टप्रकाराणां विवाहानां द्वेधा विभागः कल्पितः । यथा प्रशस्ताप्रशस्तभेदेन । तत्र प्रथम चत्वारः प्रशस्ताः, तद्व्यतिरिक्ताः अप्रशस्ताः । अत्र अष्टप्रकारकाणां विवाहानां लक्षणं संक्षेपेणोपस्थाप्यते ।

## १.१५.ब्राह्मविवाहः

तत्रादौ धर्मशास्त्रकारैः उल्लिखितानामष्टप्रकाराणां विवाहानां लक्षणं संक्षेपेण विचायते । विद्यमानेषु अष्टप्रकारेषु विवाहेषु शुद्धतमः तथा सर्वाधिकः विकशितप्रकारः ब्राह्मविवाहः । यथा मनुना प्रसङ्गेऽस्मिन् उक्तम् –

आच्छाद्य चार्च्ययित्वा च श्रुतिशीलवते स्वयम् ।
आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्त्तितः ।।

गौतमेनापि विषयेऽस्मिन् प्रतिपादितम् । यथा –

''ब्राह्मणो विद्याचरित्र – बन्धुशीलसम्पन्नाय दद्यादाच्छाद्यालंकृताम्'' । अत एव वस्त्रालंकारादिभिः अलंकृत्य वेदज्ञब्राह्मणाय यत्र कन्याया दानं भवति स विवाहः ब्राह्मविवाहनाम्ना अभिधीयते ।

### दैवः

अस्मिन् विवाहे पिता कन्यामलंकृत्य आरब्धमाने ज्योतिष्टोमादियज्ञे ऋत्विजे कर्मकत्रे कन्यादानं करोति । बौधायनधर्मसूत्रानुसारेण तत्र कन्यया दानं दक्षिणारूपेण भवति । यथा – ''ऋत्विजे वितते कर्मणि दद्यादलंकृत्य स दैवः ।'' एवं पुरा ज्योतिष्टोमादियज्ञे पुरोहिताय कन्यादानं श्रेष्ठमिति विवेचयति स्म ।

### आर्षः –

गोमिथुनप्रदानपूर्वकं कन्यादानमार्षविवाहनाम्ना अभिधीयते ।

### प्राजापत्यः –

सहोभौ धर्मं चरतामित्युक्त्वा यथा मनुगौतमाभ्यामुक्तेन प्रकारेण यः विवाहो सम्पाद्यते, सः प्राजापत्यविवाहः इति उच्यते । मनुना अभिहितं यथा –

सहोभौ चरतां धर्ममिति वाचमनुभाष्य च ।
कन्याप्रदानमभ्यच्र्य प्राजापत्यो विधिः स्मृतः ।।

अस्मिन् विषये पतिपत्न्योः समानाधिकारः विद्यते ।

**आसुरः -**

ज्ञातिभ्यः धनधान्यप्रदानपूर्वकं यत्र विवाहः सम्पाद्यते स आसुरः इति उच्यते । यथा मनुना प्रतिपादितम् -

ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै श्चैव शक्तितः ।
कन्याप्रदानं स्वाच्छन्दयादासुरोऽधर्म उच्यते ।।

स्मृतिकारैः यद्यपि अस्य विवाहस्य अप्राशस्त्यमभिहितम् । तथापि उत्तरपश्चिमभारते अस्य विवाहस्य प्रचलनमासीत् । सम्प्रति निम्नजातिषु दरिद्रकूलेषु च कुत्र कुत्रापि दृश्यते ।

**गान्धर्वः -**

यत्र वरकन्ययोः परस्परानुरागेन विवाहः सम्पद्यते स गन्धर्वनाम्ना अभिधीयते । गौतमधर्मसूत्रे - ईच्छन्त्याः स्वयं संयोगो गान्धर्वः इति ।

**राक्षसः -**

यत्र पितुः कन्यायाश्च स्वीकृतिं विना वलात्कारेण कन्याग्रहणं भवति स राक्षसविवाहः इत्युच्यते । मनुना अस्य विवाहस्य लक्षणमित्थमभिहितम् -

हित्वा च्छित्वा च भीत्वा च क्रोशन्तीं रुदतीं गृहात् ।
प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते ।।

तथा च गौतमेन - प्रसह्यादानाद्राक्षसः अर्थात् युद्धादिना कन्यापक्षं निर्जित्य कन्याया आनयनात् राक्षसविवाहो भवति । इति कथितम् ।

**पैशाचः -**

जातितः गुणतः रूपतश्च यः सर्वथा कन्यया अविज्ञातः, केवलं चौर्ये उपसंगमः रूपः कन्याभोगः यत्र संजातः, स पैशाचविवाह इति कथ्यते ।

अयं विवाहः विवाहेषु अतीवाप्रशस्तः । अपरेऽपि चत्वारः अप्रशस्ताः इति प्रायशः सवर्वैः स्वीकृतम् । परन्तु षड्विवाहाः धर्म्या इति केचन वदन्ति । यद्वा भवतु प्रसंगेऽस्मिन् याज्ञवल्क्योक्तिः स्मरणयोग्या भवति । मन्वादिभिः ब्राह्मणक्षत्रियवैश्यशूद्राणां कृते पृथक्विवाहव्यवस्था कृता । ब्राह्मणानां कृते ब्राह्मदैवार्षप्राजापत्याः प्रशस्ता इति प्रतिपादिताः । षड्विवाहाः क्षत्रियाणां कृते उक्ताः।

मुख्यतः धर्मशास्त्रकारैः चत्वारः विवाहाः प्रशस्ताः इति स्वीकृतम् । प्रशस्ते विवाहे कृते जातपुत्रः प्रशस्तः भवति । आपस्तम्बेनाऽपि उक्तम् – निन्दिते विवाहे निन्दिताः पुत्राः जायन्ते । मनुनाऽपि उक्तं यथा –

अनिन्दितैः स्त्री विवाहैरनिन्दवा भवन्ति प्रजा ।
निन्दितैर्निन्दितानृण्यं तस्मान्निन्द्यान् विवर्जयेत् ।।

प्रशस्तविवाहे जातपुत्रः पितुः क्रमशः दशम द्वादश – अष्टम – सप्तम – पुरुषपर्यन्तं पवित्रीकरोति इति आश्वलायनगृह्यसूत्रे विद्यते । धर्मशास्त्रे सवर्णविवाहः प्रशस्त इति मनुना उक्तम् – ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः ।
गान्धर्वो राक्षसश्चैव पैशाचाष्टमोऽधमः ।।

ब्राह्मादिप्रशस्तविवाहेन जातपुत्रः पूर्वापरपुरुषान् उद्धरतीति मनुगौतमादिभिः कथितम् । प्रतिलोभोजोत्पन्नाः पुत्राः धर्मकर्मसम्पादयितुमसमर्थाः इति गौतमेन प्रतिपादितम् । यथा –

वर्णान्तरगमनमुत्कर्षाभ्यां सप्तमे पंचमे वाऽऽचार्याः । धर्मशास्त्रकारैः यद्यपि विवाहः अष्टधा विभक्ताः । तथापि प्रशस्ताप्रशस्तभेदेन विवाहः द्विविधः । तत्र ब्राह्मदैवार्षप्राजापत्यादि चत्वारः विवाहाः प्रशस्ताः । अपरेऽप्रशस्ता इति प्रतिपादितम् ।

गौतमस्य मतानुसारेण विवाहेषु ब्राह्मप्राजापत्यार्षदेवाश्चत्वारो विवाहाः धर्मादनपेताः। परन्तु एके गान्धर्वासुरौ चेति सम्मिल्य षट् विवाहाः धर्म्या इति प्रतिपादयन्ति । जातिनिर्णयोऽपि गौतमेन कृतः । अनुलोम – प्रतिलोमभेदेन जातिव्यवस्था विहिता । यथा – शरीरे अधोमुखानि लोमानि शोभन्ते । तथैव उच्चवर्णपुरुषेभ्यः अधोवर्णस्त्रीषु जाताः पितृवर्णापेक्षया अधोगता अपि प्रतिलोमजापेक्षया शोभन्ते । ते च यथा –

ब्राह्मणस्य अनन्तरा क्षत्रिया तस्मात् तस्यामुत्पादितः सवर्णसंज्ञकः । क्षत्रियस्य अनन्तरा वैश्या तस्मात् तस्यां यः उत्पद्यते स अम्बष्ठः । वैश्यस्य अनन्तरा शूद्रा, तस्मात् तस्यामुत्पादितः उग्रः । एकान्तरपक्षे यथा – ब्राह्मणस्य एकान्तरा वैश्या, तस्मात् तस्यां यः जायते स निषादः । क्षत्रियस्य एकान्तरा शूद्रा, तस्मात् ब्राह्मणस्य ब्द्यन्तरा शूद्रा, तस्मात् तस्यां जातः पारशवः । इत्येते अनुलोमजाः । प्रतिलोमजाः – प्रतिकूल्येन शरीरे लोमानि यथा विकृतानि न शोभन्ते, तथा नीचवर्णपुरूषेभ्यः उच्चवर्णस्त्रीषु जाताः कुलमर्यादां नाशयित्वा शीलमपि नाशयन्ति ।त अतः प्रतिलोमजाः धर्महीना इति कथ्यन्ते ।

यथा – क्षत्रियस्य अनन्तरा ब्राह्मणी, तस्मात् तस्यां जातः सूते इति कथ्यते । वैश्यस्यानन्तरा क्षत्रिया, तस्मात् तस्यां जातः मागधः । शूद्रस्यानन्तरा वैश्या, तस्मात् तस्यां जातः आयोगवः । ततः एकान्तरा यथा – वैश्यस्य एकान्तरा ब्राह्मणी, तस्मात् तस्यां जातः कृतः । शूद्रस्य एकान्तरा क्षत्रिया, तस्मात् तस्यां जातः चण्डालः । एवमेव जातिनिर्णयः गौतमेन प्रतिपाद्य साधुविवाहेषु अर्थात् धर्म्यविवाहेषु जाताः साधुकर्मणः पुत्राः पितॄणां नरकनिस्तारकाः भवन्ति । विरुद्धोत्पन्नास्तु नरके पातयन्ति इति प्रतिपादितम् ।

| **बोधप्रश्नाः** |
|---|
| १. गृहस्थः कः ? |
| |
| |
| २. विवाहः कतिविधः ? |
| |
| |
| ३. गौतमस्य मते कति विवाहाः धर्म्याः ? |
| |
| |
| ४. अनुलोमजः कः ? |
| |
| |
| ५. प्रतिलोमजः कः ? |
| |
| |

## १.१६.गृहस्थस्य कर्माणि -

अधीतवेदस्य उद्वाहानन्तरं गृहस्थस्य इतिकर्त्तव्यता गौतमेन प्रतिपादिता । संसारेऽस्मिन् जनानां कल्याणार्थं व्यक्तित्वस्य विकासार्थं सुस्थसमाजनिर्माणार्थं धर्मशास्त्रकारैः संस्काराणां प्रवर्त्तनं कृतम्, तत्र उद्वाहानन्तरं रजोदर्शनमारभ्य षोडशाहोरात्रात्मकः कालः गर्भाधानस्य कृते सामान्येन प्रतिपाद्य आद्यास्तिस्रः निशा अवश्यं वर्ज्याः इति उपदिष्टम् । तत्रापि श्राद्धव्रतोपवासामावास्यादीनि दिनानि

वर्जयित्वा उपेयात् । गृहस्थः पञ्चमहायज्ञान् अनुतिष्ठेत् । यथा – गृहस्थः देव-पितृ-मनुष्य-भूतर्षिपूजकः भवेत् ।

देवयज्ञः – वह्नौ होमः देवयज्ञः, पितृयज्ञः – नित्यश्राद्धम् अन्नस्य वह्निसाध्यत्वेन पितृयज्ञस्य वह्निसम्बन्धः विद्यते । मनुष्ययज्ञः – अतिथिभोजनरूपः मनुष्ययज्ञः पाकसाध्यो भवति । अतः अत्रापि अग्निसम्बन्धदर्शनात् मनुस्ययज्ञ इति कथ्यते ।

भूतयज्ञः – भूतानां कृते अन्नादि भूमौ उपहाररूपेण प्रदीयते । अत्रापि अन्नादिसम्पादनं वह्निसाध्यत्वात् अग्निसम्बन्धः विद्यते ।

ऋषियज्ञः – स्वाध्याय इति कथ्यते अग्निसाध्येषु गृह्यकर्मसु मन्त्राणामुपयोगात् अग्निना साकं परम्परया सम्बन्धः विद्यते । एते पञ्चमहायज्ञाः भवन्ति ।

गौतमेन पञ्चमहायज्ञानां प्रयोगोऽपि कथितः । यथा देवयज्ञे अग्न्यादिभ्यः अग्नये स्वाहा – इत्यादिना जुहुयात् । भूतयज्ञे – प्राच्याम् इन्द्राय नमः, अग्निकोणे अग्नये नमः इत्यादिक्रमेण प्रादक्षिण्येन ईशानपर्यन्तासु दिक्षु वलिहरणम् । गृहस्थ सर्वासु द्वार्सु महद्भ्य इति बलिमुपहरेत् । गृहस्य मध्ये गृहदेवताभ्यो नमः इति बलिमुपहरेत् । वास्तुमध्ये ब्रह्मणे नमः इति बलिं दद्यात् । आकाशाय नमः इति आकाशाय बलिं दद्यात् । नक्तंचरेभ्यः सायं बलिमुपहरेत् । मनुष्ययज्ञे भिक्षवे जलदानपूर्वकं भिक्षादानम् । यतिश्च स्वस्ति इति उक्त्वा दानं गृह्णीयात् । अत्र स्मर्यते यथा – ''यति हस्ते जलं दत्त्वा भैक्ष्यं दत्त्वा पुनर्जलम् । भैक्षं पर्वतमात्रं स्यात् तज्जलं सागरोपमम् ।'' धर्मार्थकार्येष्वपि जलदानपूर्वकं दानं कर्त्तव्यमिति प्रतिपाद्य दानानुसारं फलमपि प्राप्यते इति गौतमेन उपदिष्टम् ।

## १.१७.दानफलम् -

गौतमेन दानस्य महत्वं प्रतिपाद्य तत्र दाने फलविशेषोऽपि प्रतिपादितः । यस्य वस्तुनः अब्राह्मणाय दाने यत् फलं शास्त्रेषु कथितम्, तत् जातिमात्रब्राह्मणाय दीयते तर्हि तत्र द्विषां फलं प्राप्यते । एकमात्रशाखाध्यायिने यदि दीयते तर्हि तत्र सहस्रं फलम् । सर्ववेदाध्यायिने यदि दीयते तर्हि अनन्तं फलं प्राप्यत इति ।

गौतमः दानफलकथनप्रसंगे दानीयान् प्रदर्शयति यथा – अधीतवेदः गुरवे दक्षिणादानार्थं चेत् समागतः, विवाहार्थं धनप्रार्थी, चिकित्सार्थं – कुटुम्बभरणार्थं यज्ञं करिष्यमाणार्थं पथिक – अध्ययनार्थं – विश्वजिद्यागे दत्तसर्वस्वः, यदि धनार्थमागतः तर्हि तेभ्यो यथाशक्ति द्रव्यादि अवश्यं देयम् । एते अष्टौ यदि यज्ञे आगच्छन्ति तर्हि सर्वथा तेभ्यो दातव्यम् । इतरेषु भिक्षां कुर्वत्सु भोजनार्हमन्नादि मोदकादि वा देयम् ।

## १.१८.दाने अपवादः

गौतमेन दानस्य महत्त्वं प्रतिपाद्य दानेऽपवादोऽपि प्रदर्शितः । वेश्यामद्याद्यधर्मकर्मयुक्ताय तथा यज्ञादिधार्मिककर्मसम्पादनार्थं भिक्षित्वा तत्र व्ययमकृतवते धनदानं प्रतिश्रुत्यापि न दद्यात् इति तेनैव प्रत्यपादि । अनेन प्रतिश्रुतिभङ्गदोषोऽपि न जायते इति कथितम् यथा - क्रुद्धभीतार्त्तलुब्धानां चित्तचाञ्चल्यात् ताथा वालादीनां मूढानाञ्च मोहग्रस्तत्वात् तद्वचनमप्रमाण-मपातकञ्चेति कथितम् ।

गृहस्थः स्वभोजनात् प्राक् - वाल - रोगी - गर्भिणी - स्ववासिनी - वृद्ध - सेवकादीन् भोजयेत् । यदि आचार्याः पितृसखायश्च कदाचित् गृहमागच्छेयुस्तर्हि तेषां मान्यानामादेशमनुमतिं वा गृहीत्वा परिचर्य्यां कुर्यात् ।

ऋत्विगाचार्यश्वशुरपितृव्यमातुलानां मधुपर्केण सत्कारः गृहस्थेन कर्त्तव्यः । संवत्सरे अतीते आगते पुनः मधुपर्केण सत्कारो विधेयः, न तु असकृत् समागमने इति गौतमेन स्पष्टीकृतम् । विवाहे वरस्य कृते वरत्वेन सकृत् मधुपर्कविधिः विहितः । ऋष्विजां संवत्सरमध्येऽपि असकृत् यज्ञारम्भे असकृत् मधुपर्कविधिना सत्कारो विहितः । यज्ञकर्मणि समागतयोः राज्ञः श्रोत्रियस्य च मधुपर्केण सत्कारः कर्त्तव्यः अश्रोत्रियस्य आसनोदकादिभिः सत्कारः कर्त्तव्यः । एवमेव गौतमेन आत्मना तुल्योऽधिको वा विषये समानानि शय्यासनादीनि प्रतिपाद्य उत्तमस्य उत्तमं समानस्य समानं शय्यासनं प्रदातव्यमिति उपदिष्टम् । अभ्यागते सत्कारविधिं प्रदर्श्य अतिथिसत्कारप्रसंगेऽनेन तल्लक्षणमपि कथितम्, यथा - असमानग्रामः एकां रात्रिं यापयितुं सूर्यास्तसमये यः गृहमुपतिष्टते सः अतिथिपदवाच्यो भवति । एवमेव बन्धूनां समागमेऽपि ब्राह्मणस्य कृते कुशलम्, क्षत्रियस्यानामयम्, वैश्यशूद्र......मिति द्रष्टव्यम् । एतेषां समागमेऽपि वर्णानुक्रमेण भोजनप्रदानं कर्त्तव्यमिति गौतमेन कथितम् ।

| **बोधप्रश्नाः** |
|---|
| १. गृहस्थः कदा भोजनं कुर्यात् ? |
| |
| |
| २. ऋत्विजः सत्कारः केन भवति ? |
| |
| |
| ३. कः ऋत्विक् ? |
| |
| |
| ४. गृहस्थः गृहागतं क्षत्रियं किं पृच्छेत् ? |
| |
| |

## सारांशः

प्रियपाठकाः ! अस्मिन् खण्डे धर्मशब्दनिष्पत्तिः धर्मशब्दस्य कोऽर्थः, धर्मशब्दस्य व्युत्पत्तिः च प्रतिपादिताः । धर्मलक्षणं तत्प्रमाणानि च आलोचितानि । ततः किं नाम धर्मशास्त्रम् इति प्रतिपाद्य शास्त्रान्तरपेक्षया महत्त्वं प्रतिपादितम् । तदनु विकल्पः कुत्र स्वीक्रियते इति विविच्य अतुल्यवलेऽपि व्यवस्था प्रतिपादिता । वर्णानामुपनयनकालविचारपूर्वकं ब्रह्मचारिधर्मविचारप्रसङ्गे विस्तरशः – विधिनिषेधमुखेन तद्धर्माः निरूपिताः, तत्रापि द्रव्यशुद्धिप्रकाराः, अध्ययनविधिः, अनुपनीतधर्माः उपनीतधर्माश्च प्रतिपादिताः । उपनीतधर्माः ब्रह्मचारिधर्माः इति कथ्यन्ते । प्रमुखरूपेणोपरिलिखितानां विषयाणां विवेचनमस्मिन् खण्डे जातम् । अस्मिन् खण्डे आश्रमशब्दस्यार्थः, आश्रमभेदाश्च प्रतिपादिताः । तत्र आश्रमेषु बानप्रस्थाश्रमस्य सन्न्यासाश्रमस्य च महत्त्वं प्रतिपाद्य तद्धर्माः विवेचिताः । गौतमेन– आश्रमेषु गृहस्थाश्रमः श्रेष्ठः इति प्रमाणपुरःसरं प्रतिपाद्य गृहस्थानां कर्त्तव्यानि यथा विहितानि, तानि तथैवात्र आलोचितानि । तथा च अनुलोमजानां प्रतिलोमजाश्च स्वरूपं तद्भेदाश्च निरूपिताः। ततः दानफलं दानायबादश्च प्रदर्श्य अतिथिसत्कारविधिः मधुपर्कविधिश्च प्रतिपादितः ।

## पारिभाषिकशब्दाः

४. द्विजः - उपनयनसंस्कारसंस्कृतः ।
५. आचार्यः - उपनयनाख्यं द्वितीयं जन्म यस्मात् पुरुषात् भवति सः ।
६. ज्या - धनुर्गुणः
७. पैलवः - पिलोरयम्, अर्थात् पिलु-वृक्षस्य शाखा ।
७. अपीडिताः - व्रणच्छेदकीटभक्षणादिदोषरहिताः ।
८. सशल्काः - बल्कलसहिताः ।
९. परिमार्जनं - परितो मार्जनम्, (सर्वतः जलादिना घर्षणम्) ।
१०. निर्णेजनम् - प्रक्षालनम् ।
१०. उपलः - पाषाणः ।
१०. विदलः - वंशवेत्रादीनां सूक्ष्मांशः ।
१०. अत्यन्तोपहतानां- मद्यमूत्रपूरीषादिभिरमेध्यैरत्यन्तं संस्पृष्टानाम् ।
१०. आचमनम् - शुद्ध्यर्थं ययाविधि माषमग्नं जलपानम् ।
११. खानि - खम् - आकाशः, अत्र लक्षणया शरीरस्योपरिभागे विद्यमानानि श्रोत्रनासिकामुखचक्षुरादीनि ।
११. क्षुत्वा - छिक्कानन्तरम् ।
१२. प्राणायामः - प्राणानामायामः अभिवृद्धिः (पुरक-कुम्भकरेचकानां समुदायेन एकः प्राणायामो भवति ।)
१३. व्याहृतिः - ब्राह्मण उक्तिः - (भूरिति भूलोकमसृजत् इत्यादि श्रुतेः) ।
१४. ब्रह्म - वेदः
१५. कामचारः - स्वेच्छाचरणम्
१५. कामवादः - स्वेच्छाभाषणम्
१५. कामभक्षः - बहुवारभक्षणम्, लशुनपर्युषितादिभक्षणञ्च ।
१६. अहुतात् - हुतमत्तीति हुतात्, तद् विपरीतः, अनुपनीतस्य सर्वभक्षणे प्राप्ते हुतशेषं संस्रवपुरोडाशादि नाश्नीयात् ।
१६. कल्पो - विधिः
१७. होमः - समन्त्रकं वह्नौ प्रक्षेपः ।
१७. अपामुपस्पर्शनम्- स्नानम् ।

१७. गोदानम् - केशवपनाख्यं कर्म ।

१९. मोहः - अविवेकिता

१९. वादः - शुष्कवैरम्, बहुजल्पनं वा

१९. परिवादः - विद्यमानस्यापि परदोषकीर्त्तनम् ।

१९. कण्ठप्रावृतं - कण्ठप्रावरणं वस्त्रादिना

१९. अवसक्थिका - ऊरौ पादमारूप्यावस्थापनम्

१९. अपाश्रयणम् - कुड्यस्तम्भादौ पृष्ठभागं संयोज्य तदाश्रयेणावस्थापनम् ।

१९. निष्ठीवितं - कण्ठात् सशब्दं श्लेष्मणो निष्कासनम् ।

१९. विजृम्भितम् - जृम्भिका (यत्र प्रसारितमुखभागेण श्वासो निर्गच्छति ।)

१९. अवस्फोटनम् - अङ्गुलीनामङ्गानां वा सशब्दमुपमर्दनम् ।

१९. आलम्भनं - स्पर्शः

२०. द्यूतम् - अप्राणिभिः क्रीडनम्

२०. शुक्तावाचो - अश्लीलाः वाचः

२७. भिक्षुः - संन्यासी

२८. वैखानसः - वानप्रस्थः

२८. नैष्ठिकब्रह्मचारी - निष्ठा - समाप्तिः मृत्युः (मृत्युपर्यन्तम् आचार्याधीनत्वम् । अर्थात् मृत्युं यावत् गुरुगृहेऽवस्थानम्)

२९. अनिचयः - द्रव्यसंग्रहरहितः ।

२९. ध्रुवशीलः - एकस्थाननिवासी ।

२९. जघन्यम् - पश्चादवर्त्तमानम् ।

३०. प्रहीणम् - जनैस्त्यक्तं वस्त्रं जीर्णं वस्त्रखण्डम् ।

३०. निर्णिज्य - जलादिभिः शोधयित्वा

३०. औषधयः - यवव्रीह्यादिः

३१. श्रावणकम् - वैखानसं शास्त्रम्

३३. गृहस्थः - गृहे भार्यायाः समीपे तिष्ठतीति । (न गृहं गृहमित्याहुः, गृहीणी गृहमच्यते)

३४. वीजी - उत्पादयिता पिता

३७. अनुलोमाः – अनुकूलत्वेन आमृष्टानि लोमानि यथा अधोमुखानि सन्ति शोभन्ते ।

तथा उच्चवर्णपुरुषेभ्यः अधोवर्णस्त्रीषु जाताः ।

३७. सवर्णः – ब्राह्मणपुरुषात् क्षत्रियायामुत्पांदितः ।

३७. अम्बष्ठः – क्षत्रियपुरुषः – वैश्या स्त्री तस्मात् तस्यां यः जातः ।

३७. उग्रः – वैश्यपुरुषः – शूद्रा स्त्री तस्मात् तस्यामुत्पादितः ।

३८. निषादः – ब्राह्मणः पुरुषः, वैश्या स्त्री, तस्मात् तस्यामुत्पादितः ।

३८. दौष्मतः – क्षत्रियपुरुषः शूद्रा स्त्री तस्मात्तस्यामुत्पादितः ।

## आदर्शप्रश्नाः

**निबन्धात्मकप्रश्नाः** – (प्रत्येकं २०/१५ अङ्काः)

१. वर्णानामुपनयनकालान् विलिख्य उपनीतधर्मान् प्रतिपादयत ।

२. द्रव्यशुद्धिप्रकारं निरूपयत।

३. धर्मशब्दस्यार्थं विलिख्य धर्मे प्रमाण्यं विचारयत ।

४. गृहस्थधर्मान् यथाशास्त्रं लिखत ।

५. विवाहभेदान् विलिख्य तत्र धर्म्याधर्म्यं निरूपयत ।

६. वानप्रस्थधर्मान् प्रतिपादयत ।

**विश्लेषणात्मकप्रश्नाः** – (प्रत्येकं १२/१० अङ्काः)

१. धर्मे प्रमाणानि विवेचयत ।

२. विकल्पव्यवस्थां प्रदर्शयत ।

३. ब्रह्मचारिणः अध्ययनविधिं निर्दिशत ।

४. ब्रह्मचारिणां दण्डग्रहणविधिं प्रदर्श्यत ।

५. यतिधर्मान् निर्दिशत ।

६. पञ्चमहायज्ञान् निरूपयत ।

७. अनुलोमजान् प्रदर्शयत ।

८. दानफलं दानापवादश्च विचारयत ।

**लघुप्रश्नाः** – (प्रत्येकं ५ अङ्काः)

टिप्पणी प्रदेया –

धर्मप्रमाणानि, विकल्पः, अनुपनीतधर्माः, गुरूपसदनविधिः, द्रव्यशुद्धिः, अभिवादनविधिः, प्रतिलोमजाः, दाने अपवादः, धर्म्यविवाहाः, मधुपर्कविधिः, महायज्ञाः ।

**एकाङ्कप्रश्नाः** – (प्रत्येकं १ अङ्कः)

१.धर्मस्य किं मूलं प्रमाणम् ?

२. किं नाम साहसम् ?

३. स्मृतेरपरं नाम किम् ?

४. विकल्पः कुत्र स्वीक्रियते ?

५. के द्विजातयः ?

६. किं नाम शीलम् ?

७. अवरः इत्यस्य कोऽर्थः ?

८. द्वितीयं जन्म केन भवति ?

९. हुतशेषं कः न अद्यात् ?

१०. कति आश्रमाः ?

११. शिष्यशासनं केन कर्त्तव्यम् ?

१२. आश्रमाः कति ?

१३. भिक्षुः कदा वनं व्रजेत् ?

१४. गृहस्थः कदा वनं व्रजेत् ?

१५. यवीयसीम् इत्यस्य कोऽर्थः ?

१६. कति विवाहाः ?

१७. किं नाम प्रहीणम् ?

१८. कः देवयज्ञः ?

१९. कति महायज्ञाः ?

२०. कः अश्रोत्रियः ?

२१. कः अम्बष्ठः ?

१२. गोदानं कदा कर्त्तव्यम् ?

**एकाङ्कप्रश्नानामुत्तराणि** –

१. वेदः, २. वलकृतं कर्म, ३. धर्मशास्त्रम्, ४. तुल्यवलविरोधे, ५. ब्राह्मणक्षत्रियवैश्याः, ६. आचरणम्, ७. निकृष्टः, ८. उपनयनेन, ९. अनुपनीतः, १०. चत्वारः, ११. अवधेन, १२. चत्वारः, १३. वर्षर्त्तौ (वर्षासु), १४. पञ्चाशद्वर्षे

वयसि, पुत्रमुखं पौत्रमुखं वा दृष्ट्वा, १५. न्यूनवयसीम्, १६. अष्टौ, १७. जनैस्त्यक्तं/जीर्णं वा वस्त्रम्, १८. वह्नौ होमः, १९. पश्चा, २०. वेदविद्यारहितः, २१. क्षत्रियपुरुषात् वैश्यां यः जायते, २२. षोडशवर्षे ।

❖❖❖

**(UNIT - II)**

## प्रथमप्रश्नस्य सप्तमाध्यायात् द्वितीयप्रश्नस्य तृतीयध्यायं यावत्

## २.०.प्रस्तावना

स्मार्त्तधर्मः षड्विधः यथा – वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमित्तधर्मः, साधारणधर्मः षड्सु श्चेति । स्मार्त्तधर्मेषु वर्णधर्मः अन्यतमः । वर्णाश्चत्वारः चतुर्णां वर्णानां कृते मुख्यरूपेण गौणपेण अध्ययनाध्यापनादिनि कर्माणि विहितानि । यथा – ब्राह्मणः ब्राह्मणगुरोः सकाशाद् विद्याग्रहणं कुर्यात् । परन्तु ब्राह्मणगुरोरलाभे किं कर्तव्यमिति शंकायां । गौतमेन अपात्कल्पः विहितः । अत्र आपत् नाम विपत् तत्र को कल्पः नाम विधिः – अर्थात् आपदि को विधिः । यदा मुख्यया वृत्त्या ब्राह्मणादयः जीविकानिर्वाहार्थमसमर्थाः स्युः तदा – ब्राह्मणादिवर्णानां कृते गौतमेन आपद्धर्माः प्रतिपादिताः । ततः संस्काराणां विवेचनं जातम् । तदनु स्नातकधर्मा अपि खण्डेऽस्मिन् विचारिता । धर्मसूत्रकारः महर्षिः गौतम प्रथमप्रश्ने प्रायेण आश्रमधर्मानुक्त्वा द्वितीयप्रश्ने वर्णधर्मान् प्रतिपादितवान् । ग्रन्थेऽस्मिन् प्रायेण विषयविवेचनं न क्रमपूर्वकं जातम् । अतः ग्रन्थान्तरेषु यथा क्रमवद्धतया विषयप्रतिपादनं दृश्यते, तथा ग्रन्थेऽस्मिन् नावलोक्यते यद् भवतु गौतमेन वर्णधर्मप्रतिपादनावसरे कथितं यत् त्रयः वर्णाः द्विजातिपदवाच्याः भवन्ति । ते अध्ययनमिज्यादानं च यथाशक्ति कुर्युः । परन्तु ब्राह्मणः अध्यापनं श्रौतस्मार्त्तादिकर्मसम्पादनं धर्मार्थं प्रदत्तस्य हिरण्यादेः ग्रहणं च जीविकानिर्वाहार्थं कुर्यात् । तत्रापि अध्ययनादिषु त्रिषु नियमः यतः अकरणे प्रत्यवायस्मरणात् इति प्रतिपाद्य उत्तरेषु प्रवचनादिषु न नियमः यतः अकारणे प्रत्यवायश्रवणा–भावादिति उपदिष्टम् । एवमेव अस्मिन् खण्डे ब्राह्मणादिवर्णानां जीविकानिर्वाहविधिं राज्ञः कर्त्तव्यं, तद्धधर्मान् शुल्कग्रहणाविधिं दण्डप्रयोगप्रकारश्च प्रतिपादितवान् । एते विषयाः प्रायशः खण्डेऽस्मिन् प्रतिपादिताः भवन्ति ।

## २.१.उद्देश्यकथनम्

प्रियपाठकाः ! अस्मिन् खण्डे भवन्तः निम्नप्रदर्शितान् बिन्दून् आलोचयिष्यन्ति ।

- को नाम आपत्कल्पः इति निर्णेतुं शक्नुवन्ति ।
- आपद्धर्मान् प्रतिपादयितुम् अर्हन्ति ।
- संस्कारशब्दस्यार्थमुद्देश्यञ्च ज्ञातुं प्रभवन्ति ।
- चत्वारिंशत् संस्कारान् – अष्टौ आत्मगुणान् निरुपयिष्यन्ति ।
- स्नातकधर्मान् ज्ञातुं प्रभवन्ति ।
- ब्राह्मणादिवर्णानां जीवनोपायान् राज्ञः कर्तव्यं च ज्ञातुं प्रभवन्ति ।

- क्षत्रियाणां संग्रामादिषु विजयलब्धधनविमागं निर्णेतुं प्रभवन्ति ।
- राज्ञः शुल्कग्रहणविधिं निरूपयितुं शक्नुवन्ति ।
- राजधर्मान् - प्रतिपादयितुम् अर्हन्ति ।
- वर्णानां दण्डप्रयोगप्रकारं - निर्णेतुं शक्नुवन्ति ।
- वृद्धिव्यवस्थां - निरूपयितुं प्रभवन्ति ।

## २.२.आपद्धर्मः -

गौतमेन वर्णानां कृते मुख्यरूपेण - धर्माः प्रतिपादिताः । केचन परन्तु मुख्यरूपेण यानि कर्माणि जीविकाधारणार्थं विहितानि, तानि कृत्वा यदि बहुकुटुम्बीतया जीवितुमसमर्थोभवेत्, तर्हि तत्र केन जीवेत् । तथा च अध्ययनादवपि विपत्तिः स्यात् तत्र किं कर्त्तव्यमिति शंकायां तेनोक्तं यत् - आपत् नाम विपत् तत्र विपत्तौ कः कल्पः अर्थात् विधिः । यथा - वेदाध्ययनं द्विजातिभिः कर्त्तव्यमिति मुख्यरूपेण उपदिष्टम् । तच्च ब्राह्मणादेव कर्त्तव्यमिति प्रतिपादितम् । परन्तु ब्राह्मणगुरोः अभावे अब्राह्मणात् - अर्थात् क्षत्रियात् तदभावे वैश्याद् विद्याध्ययनं कर्त्तव्यम् । तथा च गृहस्थोऽपि यदा बहुकुटुम्बीतया मुख्ययावृत्त्या जीवितुं न शक्नोति, तदा जीवनार्थं सर्वतः प्रतिगृह्णीयात् । तदसम्भवे सर्वान् अध्याययेत्, तदसम्भवे गर्हितान् अपि याजयेत् इति गौतमेन उपदिष्टम् । परन्तु यदा - ब्राह्मणः गौणकल्पेन अपि जीवितुं न शक्नोति, तदा क्षत्रवृत्त्या अर्थात् शस्त्रधारणपूर्वकं स्वजीविकां निर्वाहयेत् । यदा आपद्ग्रस्तः ब्राह्मणः वैश्यवृत्त्या जीविकां निर्वाहयेत्, तदा तस्य कृते विक्रयायोग्यानि कानिचन द्रव्याणि गौतमेन कथितानि, स वैश्यवत् सर्वं विक्रेतुं नार्हतीति ।

## २.३.आपदि वैश्यवृत्त्या जीवतो ब्राह्मणस्यापण्यानि -

चन्दनागुरुकर्पूरारादयः, गुडेक्षुरसशर्करादयः, मोदकादि, तिलाः, तन्तुघटितं वस्त्रादिकं, अजिनं लाक्षादिरञ्जितं वस्त्रं, दुग्धं सविकारं च अर्थात् दधितक्रनवनीतामिक्षाघृतादिद्रव्यम्, हरिद्रादिमूलजातीयं द्रव्यम् आम्रादिफलम्, चम्पकादिपुष्पम्, पिप्पल्यादिपुष्पम्, मधु मृगादेः छागादेर्वा मांसम्, तृणमुदकञ्च विषादिद्रव्यम् बन्ध्यागौः वत्सतरी गर्भधारिणी गौ इत्यादीनां विक्रयः आपदि वैश्यवृत्त्या जीवतो ब्राह्मणस्य कृते गौतमेन निषेधितः । प्रसङ्गेऽस्मिन् गौतमेन न केवलं स्वाभिमतं प्रकटीकृतम्, अपि तु पूर्ववर्त्तिनाम् आचार्याणामभिमतमपि प्रदर्शितम् । तेनोक्तं यत् - शस्यक्षेत्रादिन्, शरत्पक्वं धान्यं, यव-च्छाग-मेष-अश्व-वृषभ-प्रसूता गौ, बलीवर्द- प्रभृतीन् च वैश्यवृत्त्या जीवतो ब्राह्मणः विक्रयं न कुर्यात् इति । एवमेव गौतमेन आपदि वैश्यवृत्त्या जीवतो

ब्राह्मणस्य अपण्यानि प्रतिपाद्य एकस्य द्रव्यस्य अर्पणेन द्रव्यान्तरग्रहणमुक्तम् । यथा - रसानां रसैः अर्थात् तैलघृतगुडादीनां विनिमयो भवति । तथा च धान्येन सह तिलानां विनिमयो भवति । परन्तु लवण-कृतान्नयो विनिमयो न भवति । तात्कालिककृत्यनिर्वाहाय समपरिणामेन भागेन तण्डुलादिना पक्वस्य अन्नादेः विनिमयो भवति । यदि उक्तेन वैश्यकर्मणा आपद्ग्रस्तः जीवितुं न शक्नोति तदा अपण्यमपि विक्रयं कुर्यादिति प्राणशंसयेऽपि केचन आचार्या शौद्रकर्मणा जीवेदिति मतमामनन्ति । एवमेव आपदि क्षत्रियोऽपि वैश्यकर्मणा वैश्योऽपि शस्त्रधारणेन जीवेदिति प्रतिपादितम् ।

| **बोधप्रश्नाः** |
|---|
| १. आपत्कल्पः इत्युक्ते किं बोध्यते ? |
| |
| |
| २. आपद्ग्रस्तः ब्राह्मणः केन जीवेत् ? |
| |
| |
| ३. किं नाम अपण्यम् ? |
| |
| |
| ४. केन सह कस्य विनिमयो भवति ? |
| |
| |

## २.४.संस्कारशब्दस्यार्थः उद्देश्यश्च -

गौतमेन आपद्धर्मप्रतिपादनानन्तरं आपदो वारणं केन कर्त्तव्यमिति जिज्ञासायामुक्तं यत् - नियततया शासनाधिकारि राजा, संस्कारैः संस्कृतः आत्मगुणैश्च युक्तः

अधीतवेदवेदाङ्गादिशास्त्रवेत्ता ब्राह्मणः दण्डोपदेशाभ्यां जनानामापदां निवारयितारौ भवतः । तयोः राजनि बहुश्रुते ब्राह्मणे च मनुष्यजातेः वृक्षलताप्रभृतीनां, पश्वादीनां - चलन पतन प्रभृतीनां जीवानां जीवनमायत्तम् । एताभ्यां सर्वे सुरक्षिताः सुखिनश्च भवन्ति, न केवलं जीवनमात्रं तयोरायत्तम्, अपि तु सर्वविधा उन्नतिः तयोरायत्ता, अत्र कः बहुश्रुतः इति प्रश्ने उत्तरं भवति - लौकिकव्यवहारसम्पन्नः वेदवेदाङ्गवित्, इतिहासपुराणादिवेत्ता तथा च शास्त्रविहितकर्मानुष्ठाता चत्वारिंशत्संस्कारैः संस्कृतः यज्ञाध्ययनदानेषु प्रवृत्तः श्रौतस्मार्त्तधर्माचरणशीलः बहुश्रुतः इति कथ्यते । अत एव राजा कदाचिदपि एवंभूतस्य बहुश्रुत्वब्राह्मणस्य वध-बन्धन-अर्थापहरणनिर्वासनादिदण्डविधानं, -दोषकीर्त्तनम्, कार्यात् वर्जनं - राज्यात्बहिष्करणं च सत्यप्यपराधे न कुर्यात् ।

| **बोधप्रश्नाः** |
|---|
| १. लोकेऽस्मिन् सर्वापदां निवारयितारौ कौ ? |
| |
| |
| २. कः बहुश्रुतः ब्राह्मणः ? |
| |
| |
| ३. राजा सत्यप्यपराधे कं न दण्डयेत् ? |
| |
| |

## २.५.संस्काराः

**गर्भाधानम्** - गर्भ आधीयते येन कर्मणा तत् गर्भाधानम् - नाम निषेकः ।

**गर्भाधानम्**

गर्भाधानं नाम गर्भस्य आधानं ग्रहणम् । तत्र स्थूल – सूक्ष्मशरीरगतदोषापनोदनाय उपयुक्तकालः आकलितो भवति । ‘‘गर्भं संधार्यते येन कर्मणा तद् गर्भाधानमित्यनुगतार्थकर्म नागधेयम् ।’’

गर्भाधानस्य समयविषये धर्मशास्त्रकाराणां मतैक्यं नास्ति । रजोदर्शनात् षोडशरात्रिं यावत् स्त्रीणां स्वाभाविकः ऋतुकालः । तत्र एतादृशः विधिः मनुना विहितः यथा –

ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः । इति ।

## पुंसवनम्

पुंसवनं – नाम गर्भस्थस्य शिशोः पुत्रत्वं विधातुं यत् कर्म भवति, तत् पुंसवनमित्युच्यते ।

पुमान् प्रसूयते येन कर्मणा तत् पुंसवनमिति ।

वैदिककाले पुत्रप्राप्त्यर्थं मन्त्राः सृष्टाः । गृह्यसूत्रेषु गर्भाधानान्तरं तृतीय – चतुर्थमासे पुंसवनसंस्कारस्य विधानं दृश्यते । यथा पारस्करगृह्यसूत्रे अस्य संस्कारस्य विधानं प्रदर्शितम् । याज्ञवल्क्येन अस्य संस्कारस्य समयः प्रदर्शितः ।

गर्भाधानमृतौ पुंसः सवनः स्यन्दनात् पुरा ।
षष्ठेऽष्टमे वा सीमन्तो मास्येते जातकर्म च ।।

अनेन ज्ञायते यत् गर्भचलनात् पूर्वं गर्भस्य पुंसीकरणम् ।

## सीमन्तोन्नयनम्

सीमन्ते स्थितानां केशानामुन्ननयनं सीमन्तोन्नयनम् । अर्थात् सीमन्तोन्नयनमिति कर्मनामधेयम् । गर्भस्य षष्ठे अष्टमे वा मासि विहितः गर्भसंस्कारविशेषः ।

संस्कारेऽस्मिन् पतिः स्त्रियाः केशापाशमलंकुर्वन् तस्मिन् सीमन्तं रचयति । एतेन गर्भभारक्लान्ता माता प्रमोदिता भवति । वैदिकयुगे सीमन्तोन्नयनसंस्कारः गर्भाधानात् चतुर्थमासे सम्पादितो भवति । तत्र शुक्लपक्ष पुंसा नक्षत्रेण चन्द्रमायुक्तो भवति । तदानीमयं संस्कारः सम्पाद्यते । सामवेदस्य मन्त्रब्राह्मणे अयं मन्त्रः प्राप्यते यथा –

अस्य संस्कारस्य विधिविधानं गृह्यसूत्रेषु विस्तरशः प्राप्यते । वस्तुतः मातृपूजा श्राद्धादि अनुष्ठीयते ।

## जातकर्म

यदा शिशुः भूमिष्ठो भवति तदानीं महान् आनन्दः जायते। तदानीमेतादृशः संस्कारः क्रियते । जन्मकालिकनाडीछेदनादि ।

प्राङ्नाभिवर्धनात् पुंसो जातकर्म विधीयते ।

मन्त्रतः प्राशनं चास्य हिरण्यमधुसर्पिषाम् ।।

यदि मृताशौचमध्ये पुत्रः जायते तदानीं किं कर्त्तव्यमिति जिज्ञासायां स्मृतिसंग्रहवचनं स्मर्यते । यथा –

मृताशौचस्य मध्ये तु पुत्रजन्म यदा भवेत् ।
अशौचापगमे कार्यं जातकर्म यथाविधि ।।

तस्मिन् जातकर्मसंस्कारे पिता जातस्य कुमारस्य मुखं दृष्ट्वा सचैलं स्नानं कृत्वा पित्रादिगुरुजनान् आमन्त्र्य नान्दीमुखश्राद्धादीन् कृत्वा जातकर्म आचरेत् । नवजातस्य शिशोः उद्देश्येन प्रथमं तावत् वैश्वानरस्य परितोषः क्रियते । तेन च कालान्तरे शिशोः शक्तेः तेजस्तितायाश्च अभिवृद्धिः भवति । यथा विधिवचनं विद्यते । जाते पुत्रे पिता वैश्वानरः द्वादशकपालं निर्वपेत् ।

जातकर्मसंस्कारविषये पारिजाते वसिष्ठेनोक्तम् यथा –

''श्रुत्वा जातं पिता पुत्रं सचैलं स्नानमाचरेत् ।''

मनुना तु – ''प्राङ्नाभिवर्द्धनात् पुंसो जातकर्म विधीयते ।
मन्त्रवत् प्राशनं चास्य हिरण्यमधुसर्पिषाम् ।।''

अत्र वर्द्धनं नाम छेदनम् । श्राद्धे वै पुत्रजन्मनि इत्यत्र पुत्रपदेन कन्याऽपि गृह्यते ।

## नामकरणम्

एकादशदिनादौ क्रियमाणं नामनिर्देशकर्म नामकरणमिति कथ्यते। संस्कारेषु नामकरणस्य महत्त्वं सर्वजनविदितम् । यस्मिन् काले मनुष्यः भाषायाः विकाशमकार्षीत् । तदानीं स्वजीवनकाले दैनिकव्यवहार्यवस्तूनां नामकरणार्थं प्रयत्नशीलोऽभूत् । यतः नामकरणं विना सुसंगठितसमाजे व्यवहारो नैव संभाव्यते । अत एव हिन्दवः अतीव प्राचीनकालात् व्यक्तिगतनामकरणस्य महत्त्वमनुभूय नामकरणं प्रथमधार्मिकसंस्कारत्वेन परिणतमकुर्वन् । नामकरणेन मनुष्यः कीर्त्तिं प्राप्नोति । अतः नामकरणं कर्म अतीव महत्त्वपूर्णमिति ज्ञायते । यथा –

नामाखिलस्य व्यवहारहे शुभावहं कर्मसु भाग्यहेतुः ।
नाम्नैव कीर्त्तिं इत्यादि ।।

नाम्नः महत्त्वमधिकृत्य बृहदारण्यकोपनिषदि उक्तम् ।

याज्ञवल्क्येति होवाव यत्रायं पुरुषो ग्रियते किमेनं न जहातीति नामेत्वन्तवहि नामानन्ता विश्वदेवा अनन्तमेव स तेन लोकं जयति । यदा शिशुः भूमिष्ठो भवति तदानीं जातकर्मसंस्कारः क्रियते तत्र गृह्यनाम दीयते । परन्तु जन्मनः दशमे वा द्वादशे

दिने पुण्यमुहूर्त्ते सर्वलोक-प्रकाशयोग्यनामकरणं भवति । नामोच्चारणे कृते मधुरध्वनिः यथा निर्गच्छेत् तथा नामकरणं कर्त्तव्यम् । एतदर्थं वसिष्ठधर्मसूत्रे उक्तं यथा -

यदक्षरं प्रतिष्ठाकामश्चतुरक्षरं ब्रह्मवर्यसकामः ।

मनुनापि उक्तं यथा -

मागंल्यं ब्राह्मणस्य स्यात् क्षत्रियस्य वलान्वितम् ।
वैश्यस्य धनसंयुक्तं शूद्रस्य तु जुगुप्सितम् ।।

बौधायनानुसारं पुरुषाणां नामानि ऋषि-देव-पूर्वजानां नामानि अधिकृत्य भवेयुरिति । स्त्रीणां नामकरणविषये मनुना स्पष्टीकृतम् । यथा -

स्त्रीणां सुखोद्यमक्रूरं विस्पष्टार्थं मनोहरं ।
मांगल्यं दीर्घवर्णान्तमाशीर्वादाभिधावत् ।।

## अन्नप्राशनम्

नवजातस्य शिशोः षष्ठमासे अन्नप्राशनस्य कर्त्तव्यता मनुगौतमोदिभिः प्रतिपादिता । यथा - ''षष्ठेऽन्नप्राशनं मासि....''। आयुर्वेदेऽपि अस्य संस्कारस्य विधानं श्रुयते यथा - ''षण्मासं चेत्मन्नं प्राशनं प्राशयेल्लघुहितकरम् ।'' अनेन संस्कारेण न केवलमन्नप्राशनात् शिशुः जीवनं धारयति । अपि तु व्यक्तित्वस्य विकाशाय अयमन्नप्राशानाख्यः संस्कारः अतीवोपयोगी भवति । यथा - आहारशुद्धौ सत्त्वशुद्धिः, सत्त्वशुद्धौ ध्रुवा स्मृतिः ।

गृह्यसूत्रेषु पिता शिशोः यादृशीमभिवृद्धिं अभिलषति, तादृशं भोजनं तस्मै प्रयच्छति । परन्तु स्वास्थ्यवर्द्धनार्थं शिशवे लघुभोजनं दद्यादिति शुश्रुतस्य अभिमतम् ।

## चूडाकरणम्

केशानां कर्त्तनरूपाख्यं कर्म चूडाकरणमित्युच्यते । अनेन संस्कारेण शिशुः दीर्घायुर्भवति । तथा अकरणे आयुः नश्यति । अत एव अस्य संस्कारस्य अनिवार्यता विद्यते एव । यथा -

पापोपशमनं केशनखरोमापमार्जनम् ।
ईषल्लाघवसौभाग्यकरमुत्साहवद्र्धनम् ।।

चरकस्य मतानुसारेण -

''षौण्ढिक वृष्यमायुष्यं शुचिरूपं विराजनम् ।
केशश्मश्रुनखादीनां कर्त्तनं सम्प्रसाधनम् ।।''

क्षौरर्मकाले क्षुरस्य स्मृतिः क्रियते । यथा – ओम् शिवो नामासि स्वधितिस्ते पिता नमस्ते मामा हिंसीः ।

पिता स्वयं केशच्छेदनं कुर्यादिति विधानं यजुर्वेदे दृश्यते । यथा – ओम् निवर्त्तयाम्यायुधेऽन्नाद्याय प्रजननाद रावस्योषाय सुवीर्याय इति गृह्यसूत्रेषु अस्य संस्कारविधिः विस्तृततया प्रतिपादितः । गृह्यसूत्रानुसारेण चूडाकरणाख्यसंस्कारः प्रथमाब्दे तृतीयाब्दे वा करणीय इति प्रतिपादितम् । स्मृतिकाराग्रगण्येन मनुना इदमेवाभिमतं प्रकटीकृतम् । यथा – चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः ।

प्रथमेऽब्दे तृतीये वा कर्त्तव्यं श्रुतिचोदनात् ।।

यद्यपि इदानीमेतादृशः संस्कारः उपनयनसंस्कारकाले सम्पाद्यते, तथापि धर्मशास्त्रकाराणां प्रथमवर्षे चौलकर्मसंस्कारः करणीय इति अभिमतं विद्यते ।

प्रथमाब्दे चौलकर्मकरणेन शिशुः दीर्घायुः भवति । तथा ब्रह्मचर्यं च प्राप्नोति । तृतीयाब्दे चूडाकर्मसंस्कारकरणेन सर्वकामनायाः पूर्त्तिः भवति । तथा पशुकामव्यक्तिः पंचमे वर्षे इमं संस्कारं कुर्यादिति तत्रैव उक्तम् । यदि माता गर्भिणी विद्यते तर्हि शिशोः क्षौरकर्म न कर्त्तव्यमिति बृहस्पतिवाचनाद् ज्ञायते । यथा – गर्भिण्यां मातरि शिशोः क्षौरकर्म न कारयेत् इति ।

## उपनयनम्

उपनयनं नाम आचार्यस्य समीपे वेदाध्ययन – व्रताचरणादिनिमित्तं स्वपित्रादिभिः नयनं प्रापणम् । प्राचीनकालात् प्राक् अस्य संस्कारस्य प्रचलनं जातम् । अस्मिन् संस्कारे ब्रह्मचर्यपालनं प्रमुखत्वेन विहितम् ।

ब्रह्मचर्यशब्दस्य प्रयोगः ऋक्वेदेः दृश्यते । वैदिककाले छात्रस्य संज्ञा ब्रह्मचारी, अध्यापकस्य संज्ञा आचार्यः आसीत् । उपनयनसंस्कारेण संस्कृतः द्विजः इति उच्यते । आचार्यः यदा उपनयनं करयति । तदानीं ब्रह्मचारिणं त्रिरात्रं यावदुदरे धारणं करोति इति अथर्ववेदे विद्यते । यथा –

आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः ।
तं रात्रीस्त्रिस्र उदरे विभर्त्ति तं जातं द्रष्टुमभिसंन्ति देवा ।।

उपनयनसंस्कारेण संस्कृतः ब्रह्मचारी पवित्रमेखलायाः मृगचर्मणः श्मश्रुनखादीनां धारणपूर्वकमग्नौ हवनं करोति । भिक्षां कृत्वा स्वजीविकां पालयति च । कालान्तरे चतुर्णामाश्रमाणां व्यवस्था जाता । तत्र प्रथमाश्रम ब्रह्मचर्याश्रमः । यदा ब्रह्मचारी

ब्रह्मविद्या–ध्ययनार्थमायार्यसमीपं गच्छति । तदानीमायार्योऽपि तस्य विद्याधारणादि सामर्थ्यं संपरीक्ष्य तस्मै विद्यादानं करोति स्म । यतः तैत्तिरीयोपनिषदि अशिष्याय विद्यादानं न कर्त्तव्यमिति प्रतिपादितम् ।

## २.६.चत्वारि वेदव्रतानि –

गौतमधर्मसूत्रानुसारं परिगणितेषु प्राचीनतमसंस्कारेषु वेदारम्भस्य तथा गोदानस्य उल्लेखः नैव प्राप्यते । परन्तु तत्र यत्वारि वेदव्रतानि उल्लिखितानि । यथा आश्वलायनानुसारं महानाम्नि, महाव्रत, उपनिषद्, तथा गोदानमिति चत्वारि वेदव्रतानि । यद्यपि मूलतः व्रतमितं सर्वेषां द्विजातीनां कृते अभिप्रेतमासीत् । परन्तु अस्य व्रतस्यानुष्ठानं केवलं ब्राह्मणपरिवारे प्रचलितमासीत् । यतः वेदेषु संस्थितानां शाखानां यथा वैदिककर्मकाण्डविषयाणां वेदेषु संस्थितानां शाखानां तथा वैदिककर्मकाण्डविषयाणामध्ययनार्थमयं संस्कारः प्रचलितः आसीत् । परन्तु ।

**समावर्त्तनम्** – स्नानं समावर्त्तनाङ्गभूतम् । तेन समावर्त्तनं लक्ष्यते । समावर्त्तनं नाम आश्रमात् गृहं प्रत्यावर्त्तनं समावर्त्तनमित्युच्तयते । समावर्त्तनसंस्कारे विद्यायुक्तस्य ब्रह्मचारिणः शास्त्रानुसारेण स्नानकर्म सम्पाद्यते । एतदर्थं समावर्त्तनस्य नामान्तरं स्नानमिति जातम् । स्नानं कृत्वा स स्नातकपदवाच्यः भवति । पाणिनिना स्नातकस्य नामान्तरं समविद् इति कृतम् । वैदिकयुगादारभ्य स्नातकः प्रायशः समाजस्य सर्वोच्चपुरुषरूपेण परिगण्यते । स्नातकभेदाः विद्यते ।

## उद्वाहः

सहधर्मचारिणी – भार्या, तया सह संयोगो यस्मिन् संस्कारे भवति स उद्वाह इति कथ्यते । पञ्चमहायज्ञाः – यथा देवयज्ञः, पितृयज्ञः, मनुष्ययज्ञः, भूतयज्ञः, ब्रह्मयज्ञः ।

त्रिस्रः अष्टकाः, सप्तपाकयज्ञसंस्थाः यथा – पार्वणः – पर्वणि क्रियमाणः, स्थालीपाकः, श्राद्धं मासि मासि दर्शेषु क्रियमाणम् । श्रावणी :– श्रावणपूर्णिमायां विहितं श्रवणाकर्म । आग्रहायणी – मार्गशीरपूर्णिमायां विहितं सर्पवल्युत्सर्गादिकर्म । चैत्री – चैत्रपूर्णिमायां विहितं कर्म, आश्वयुजी – आश्विनपूर्णिमायां विहितं कर्म । एते पाकसाध्या यज्ञाः पाकयज्ञाः भवन्ति । अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासावाग्रयणं चातुर्मास्यानि निरूढपशुबन्ध, सौत्रामणीति सप्तहवियज्ञसंस्थाः । अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशीवाजपेयोऽतिरात्राप्तर्याम् इति सप्तमोमसंस्थाः । एते उपरोक्ता गर्भाध्यानाद्या आप्तोर्यामान्ताश्चत्वारिंशत् संस्काराः भवन्ति । ततः अष्टावात्मगुणाः

यथा - सर्वभूतेषु दया, क्षान्तिः अर्थात् परदोषमर्षणं, अनसूया अर्थात् दोषानाविष्करणेन गुणाविष्करणं, शौचम् अर्थात् वाह्याभ्यन्तरशुद्धिः, अनायासः अर्थात् येन शरीरं शुभेन अशुभेन वा न पीड्यते तत्, मङ्गलम् अर्थात् प्रसस्ताचरणम्, अकार्पण्यम् अर्थात् आपद्यपि अदीनता, तथा च अस्पृहा अर्थात् सन्तोषः, एते अष्टौ आत्मगुणाः भवन्ति ।

| **बोधप्रश्नाः** |
|---|
| १. कति कानि वेदाङ्गानि ? |
| |
| |
| २. किं नाम पुंसवनम् ? |
| |
| |
| ३. गौतममते कति संस्काराः ? |
| |
| |
| ४. कति वेदव्रतानि ? |
| |
| |

**स्नातकः** –

स्नात एव स्नातकः इति कथ्यते । यथशक्ति एकस्य वेदस्य, वेदयोः वेदानां वा अध्ययनं कृत्वा गुरवे दक्षिणां दत्वा अथवा तदनुमत्या समावत्तनात् परं अर्थात् समावत्तनाङ्गस्नानं यस्य जातं स स्नातः, स्नानमारभ्य परिणयनपर्यन्तं स स्नातकपदवाच्यः । परिणयात् परं गृहस्थसंज्ञा मुख्या । तत्र गृहस्थधर्माश्च मुख्याः स्नातकधर्माश्च तद्विरोधेनाचरणीया इति । अत एव स्नानानन्तरं स्नातको भवति । स च विवाहानन्तरं गृहस्थसंज्ञा लभते । स्नातकः नित्यं वाह्याभ्यन्तरशौचयुक्तः स्यात् । तथा च – चन्दनादिसुगन्धयुक्तः, नित्यस्नायी भवेत् । जीर्णं मलयुक्तं च वस्त्रं न धारयेत् धनाभावे जीर्णमपि वस्त्रं परिष्कृत्य धारयेत् । रक्तवस्त्रम् अतिसूक्ष्मम् अन्यधृतं च वस्त्रं न धारयेत् । विनाकारणं अभिवृद्धं श्मश्रु नखञ्च न धारयेत् । युगपत् अग्निमपश्च न धारयेत् । अञ्जलिना जलं न पिवेत् । दण्डापमानः उद्धृतोदकेन नाचामेत् । परन्तु उपविशन् नद्यादौ च जले तिष्ठन्, जलेनाचामेत् । शूद्रसंस्पर्शेणागतेन जलेन नाचामेत् । वायु–अग्नि–आदित्य–विप्र–गाश्च देवताः भवन्ति । अत एताः देवताः गाश्च पश्यन् अभिलक्ष्य वा मूत्र पुरीषादिन् न कुर्यात् स्नातकः । पत्र – मृत्तिकाखण्डपाषाणादिभिः मूत्रपुरीषयोः अपकर्षणं (मार्जनं) न कुर्यात् । म्लेच्छादिभिः सह सम्भाषणं न कर्त्तव्यं स्नातकेन इति प्रतिपाद्य यदि अज्ञानपूर्वकं सम्भाषणं विहितं तर्हि पुण्यकृतः नामग्रहणं कर्तव्यमिति गौतमेन उपदिष्टम् । अथवा – ब्राह्मणेन सह कथोपकथनं कुर्यात् स्नातक इति । बन्ध्या गौः धेनुभव्येति, अभद्रं वस्तु भद्रमिति ब्रूयात् । स्ववत्सां पाययन्तीति दृष्ट्वा गोस्वामिने न सूचयेत् । तथा च पिवन्तीं गां न वारयेत् । रजस्वलादिकं न स्पृशेत् । कन्यां न कामपूर्वकं स्पृशेत् । अग्नेः मुखेन फुत्कृत्य प्रज्वालनम्, शुष्ककलहं, उत्तरीयाद्युपरिमाल्यधारणं वहिः गन्धधारणम्, अस्थ्यादिना शिरः कण्डूयनम्, स्त्रीया सहभोजनम्, कुद्वारेण गृहेप्रवेशनम् पादेन पादान्तरोपमर्दनपूर्वकं पादप्रक्षालनम् पीठिकायाम् अन्नपात्रं संस्थाप्य भोजनम् बाहूभ्यां नद्याः तरणम्, वृक्षादेः आरोहणम्, कूपगर्त्तादौ अधोगमनम्, प्राणपीडाकरं च कर्म सर्वथा स्नातकः वर्जयेत् । वातवेगाद्याकुलतया जीर्णतया वा संदिग्धां नावं सर्वथा नाधिरोहेत् । रात्रौ शिरसः प्रावरणं कृत्वा भ्रमणं कर्त्तव्यमिति गौतमेन कथितम् । भस्मादिषु मुत्रपुरीषे न कुर्यात् । योषितं नग्नां नेक्षेत । गुप्तेन्द्रियं मैथुनेच्छया न चालयेत् । अकारणं घटादेः भेदनं, तृणादीनां दहनम् स्वकुलात् कुलान्तरगमनं, स्वशाखां परित्यज्य शाखान्तरगमनं, क्रोडे संस्थाप्य भोजनम्, उद्धृतस्नेहद्रव्यादिभोजनम् नग्नः शयनम्, परधनायहरणम्, अधर्मोपायेन अर्थाहरणम्, च

सर्वथा स्नातकः वर्जयेत् । अन्ततो गत्वा गौतमेन कथितं यत् - स्नातकः सहिष्णुः प्रारब्धस्य कर्मणः समापयिता, संयमी, दानशीलश्च भवेत् । अलब्धस्य लाभार्थं लब्धस्य संरक्षणार्थं राजानमुपेयात् । अत एव गौतमेन कथितं यत् - योगक्षेमार्थमीश्वरमधिगच्छेदिति, योगः - अलब्धस्य लाभः क्षेमः - प्राप्तस्य संरक्षणम् एवमेव स्नातकः स्वधर्माचरणं कृत्वा मातापितॄन् तथा पितामहादीन् पुत्रादीन् दुरितेभ्यः मोक्षयिष्यन् चिरं ब्रह्मलोके तिष्ठतीति ।

| **बोधप्रश्नाः** |
|---|
| १. कः स्नातकः ? |
| |
| |
| २. स्नातकः कैः सह न संभाषेत् ? |
| |
| |
| ३. स्नातकः स्वधर्माचरणेन कुत्र तिष्ठति ? |
| |
| |
| ४. अधेनुं किमिति ब्रूयात् ? |
| |
| |
| ५. योगशब्दस्य कोऽर्थः ? |
| |
| |
| ६. क्षेमशब्दस्य कोऽर्थः ? |
| |
| |

## ब्राह्मणादिवर्णानां जीवनोपायाः -

गौतमेन द्विजातीनां कृते अध्ययनमिज्यादानं नित्यत्वेन उपदिश्य - ब्राह्मणस्य कृते जीविकानिर्वाहार्थं प्रवचनम् अर्थात् अध्यापनम् । याजनं नाम श्रौतस्मार्त्तादिकर्मसम्पादनम्, प्रतिग्राहो नाम धर्मार्थं दत्तस्य हिरण्यादेः द्रव्यस्य

स्वीकरणम् च विहतम् । अत्र गौतमेनेदमपि स्पष्टीकृतं यत् पूर्वेषु – नित्यत्वेन प्रतिपादितेषु अध्ययनादिषु नियमः । यतः अकरणे प्रत्यवायस्मरणात्, परन्तु अध्यायनादिषु उत्तरेषु न नियमः । यतः अकरणे प्रत्यवायकथना भावादिति । तथा च वृत्त्यर्थं नामजीविकानिर्वाहार्थं ब्राह्मणः अन्येन व्यक्त्यन्तरेण कृषिकर्म–वाणिज्यं च कारयेत् । बृद्ध्यर्थं धनप्रयोगमपि कृत्वा जीवेदिति तेनैव कथितम् । ततः क्षत्रिय शास्त्रधारणपूर्वकं सर्वभूतानां रक्षणं कृत्वा जीवेत् । गौतमेन प्रसङ्गेऽस्मिन् इदमपि कथितं यत् शास्त्रसम्मतं दण्डविधानं राजा कुर्यादिति । विना प्रार्थनां वेदाध्यायिनां ब्राह्मणानां रक्षणं कुर्यात् । ये च जीविकानिर्वाहार्थमसमर्थाः तान् अब्राह्मणान् अपि राजा भरणं पोषणं च दद्यात् । किं वा ब्राह्मणान् इति । ये च करमुक्ताः ब्राह्मणाः भवेयुः तेभ्यः करं राजा न गृह्णीयात् । ये च वैद्यादयः उपकुर्वाणाःस्तान् अपि राजा विभृयात्, राजा विजयार्थं उद्योगं कुर्यात् । राजा शस्त्रधारणपूर्वकं रथोपरि भ्रमेत् । युद्धे मरणभयात् कदाचिदपि पश्चाद् गमनं युद्धत्यागं वा राजा न कुर्यात् । युद्धे हिंसायां दोषो नास्ति परन्तु–युद्धक्षेत्रे यदि सैनिकः अश्वादिभ्यो पतितः, सारथिरहितः आयुधहीनः कृताञ्जलिपूर्वकं वद्धकरः युद्धेन क्लान्तः प्रकीर्णकेशयुक्तः, प्रत्यावर्त्तनशीलः उन्नतस्थानाधिरुढः वृक्षादि अधिरूढो वा आत्मानं दूत इति परिचयप्रदाता वा राज्ञा अवध्यो भवतीति गौतमेन प्रतिपादितम् । तथा च – यदि युद्धक्षेत्रे पराहतः क्षत्रियः विजेतुः राज्ञः सविधेस्थित्वा सेवादिकर्मणा जीवितुमिच्छति तर्हि राजा तं क्षत्रियवृत्त्या योजयेदिति गौतमेन उपदिष्टम् । एवमेव ब्राह्मणक्षत्रिययोः जीवनोपायाः राज्ञः कर्त्तव्यश्च गौतमेन प्रतिपादिताः ।

| **बोधप्रश्नाः** |
|---|
| १. ब्राह्मणः केन जीवेत् ? |
| |
| |
| २. क्षत्रियः केन जीवेत् ? |
| |
| |
| ३. केभ्यः राजा करग्रहणं न कुर्यात् ? |
| |
| |

| |
|---|
| ४. युद्धे हिंसायां पापं भवति न वा ? |
| |
| |
| ५. राजा विजयलाभार्थं किं कुर्यात् ? |
| |
| |

## संग्रामलब्धवित्तविभागः -

युद्धे यः एकाकी यद् वित्तं (हिरण्यदिवित्तं) जयति तत् सांग्रामिकं वित्तं जेता लभेत । तत् राजा न गृह्णीयादिति गौतमेन कथितम् । परन्तु यत्र युद्धे कश्चित् हस्त्यश्वरथादिवाहनं जयति तत् राज्ञ एव न जेतुः इति तेनैव स्पष्टं प्रतिपादितम् । अपृथग्जये यत्र सैनिकाः मिलिताः द्रव्यादिकं जयन्ति, तत्र राज्ञः कृते उद्धारव्यवस्था गौतमेन प्रत्यपादि । अर्थात् तत्र विजयलब्ध- धनेषु किमपि विशिष्टद्रव्यं राज्ञे दत्वा अन्यत् सर्वं शौर्यकार्यादिविचारपूर्वकं राजा विभजेदिति । प्रसङ्गेऽस्मिन् गौतमेन इदमपि कथितं यत् कृषिकर्मकारिभिः स्व स्वशस्यक्षेत्रानुरूपम् अर्थात् ऊर्वरक्षेत्रादधिकमुपद्यते इतिकृत्वा षष्ठांशम्, मध्यमक्षेत्रात् अष्टमभागम्, अनुर्वरक्षेत्रात् दशमोभागं वलिरूपेण नाम द्रव्यरूपेण राजभागप्रदानं करणीयमिति । अत्र द्रव्यरूपेण ग्राह्यो राजभागो वलिरिति कथ्यते । हिरण्यादिरूपेण भूसम्बन्धी राजग्राह्यो भागः करः इति कथ्यते, अत एव बलिकरयोर्भेदः विद्यते इति । ये च पशुपालनं कृत्वा पशुभिः जीवन्ति ये च हिरण्यादिप्रयोगेण कुसीदवृत्त्या जीविकां पालयन्ति, तेभ्यः सकाशात् राज्ञा पञ्चाशत्तमो भागः ग्राह्यः । अत्र यः राजभागः स शुल्कसंज्ञकः । व्यवसायिभिः अर्थात् वणिग्भिः विंशतितमो भागः शुक्लरूपेण प्रदातव्यः । मूलफलपुष्पौषधमधुमांसातृणेन्धनानां द्रव्याणां वाणिज्ये राज्ञा षष्ठतमोभागः ग्राह्यः वणिग्भिः आपणे/विपण्यां प्रसार्य यद् विक्रीयते तत् पण्यम् । तत्र विशतितमो भागः शुल्कः अत्र शंका जायते यत् राज्ञा करबलिशुल्कादिग्रहणं करणीयमितिकथमुच्यते, उत्तरं भवति । तेषां सर्वेषां रक्षणधर्मित्वात् बल्यादिग्रहणं समुचितमिति ।

| **बोधप्रश्नाः** |
|---|
| १. सांग्रामिकमित्युक्ते किं बोध्यते ? |
| |

| |
|---|
| |
| २. करः इत्यस्य कोऽर्थः ? |
| |
| |
| ३. वलिः इत्यस्य कोऽर्थः ? |
| |
| |
| ४. शुल्कशब्दस्य कोऽर्थः ? |
| |
| |
| ५. किं नाम पण्यम् ? |
| |
| |
| ६. पण्ये कियान् शुल्कः राज्ञाः ग्राह्यः ? |
| |

## राज्ञः शुल्कग्रहणविधिः

गौतमेन राज्ञः शुल्कग्रहणप्रसंगे कथितं यत् कृषिकर्मकारिभिः शस्यक्षेत्रानुरूपं दाशममष्टमं षष्ठं वा उत्पन्नद्रव्यस्य राजसम्बन्धिबलिदानं कर्त्तव्यम् । अत्र उत्तम-मध्यमाधमक्षेत्रानुसारं बलिदानं विहितम् । ये च पशुभिः जीवन्ति ये च हिरण्यप्रयोगेण कुसीदवृत्त्या अर्थात् अर्थवृद्धिदृष्ट्या जीवन्ति, तेभ्यः सोदयमूलधनात् पञ्चाशद्भागः नाम पञ्चात्तमो भागः राज्ञा ग्राह्यः । अत्र यः राजभागः गौतमेन कथितः स शुल्कसंज्ञकः। यत्र च व्यवसायिभिः विपण्यां द्रव्याणि प्रसार्य विक्रीयते तत् पण्यनाम्ना कथ्यते । तत्रापि विंशतितमो भागः शुल्कः राज्ञा ग्राह्यः । मूलफलपुष्पौषधमधुमांसतृण - इन्धनानां द्रव्याणां विक्रये षष्ठतमो भागः शुल्करूपेण राज्ञा ग्राह्यः ।

यतः तेषां बल्यादिदायिनां रक्षणमेव राज्ञः धर्मः । अतः तद्रक्षणधर्मित्वात् राजा बल्यादि गृह्णीयात् । ये च शिल्पिनः अलङ्कारादिनिर्माणं कुर्वन्ति ते प्रतिमासम् - एकैकम् अहः राज्ञः कृते समर्पयेयुः । तदेव तेषां करः इति गौतमस्याभिप्रायः । ये च शारिरीकं श्रमं स्वीकृत्य जीवन्ति ते प्रतिमासम् एकैकं दिनं राज्ञः कृते कर्म कुर्युः । ये च नौकां - शकटादियानं वा चालयित्वा जीवन्ति तेऽपि प्रतिमासम् एकमहः कर्म-

कुर्युः । तत्र राजा तेभ्यः विना वेतनं कर्मसम्पादकेभ्यः शिल्पिप्रभृतिभ्यः कर्मसम्पादनदिवसे भोजनं दद्यात् । प्रणष्टं द्रव्यम् अर्थात् प्रकर्षेण सर्वोपायैरपि अदृष्टमलब्धं हिरण्यादिवस्तु अधिगम्य राज्ञे प्रब्रूयुः दद्युश्च । तत्र राजा तद् द्रव्यं वर्षं संरक्ष्य यदि द्रव्यस्वामी नागच्छेत् तर्हि अधिगन्तवे अर्थात् द्रव्यं लब्धवते द्रव्यस्य चतुर्थमंशं दत्वा अवशिष्टम् अंशत्रयं राजकोषे प्रवेशयेत् । रिक्थक्रयसंविभागपरिग्रहाधिगमेषु स्वामित्वमागच्छतीति गौतमेन कथितम् । अत्र रिक्थं नाम अप्रतिबन्धो दायः । क्रयः - यथापरिकल्पितमूल्यविनिमयेन द्रव्यग्रहणम् । संविभागः - सप्रतिबन्धो दायः, परिग्रहः - अनन्यपूर्वस्य द्रव्यस्य स्वीकारः, अधिगमः - निध्यादेः प्राप्ति, एतेषु प्रदर्शितेषु सत्सु कारणेषु ब्राह्मणादिः सर्वः स्वामी भवति । अत्र इदमपि गौतमेन स्पष्टीकृतं यत् - परिग्रहेण प्राप्तं वस्तु ब्राह्मणस्याधिकं - तत्र स एव स्वामी, परन्तु अपरश्चेत् प्रतिगृह्णाति तस्य कृते प्रतिग्रहस्य अविहितत्वात् स न स्वामी अपि तु दण्ड्यः । गौतमेन क्षत्रियविषये कथितं यत् युद्धे जित्वा प्राप्तं धनं क्षत्रियस्य भवेदिति । यतः क्षत्रियस्य कृते तदेव उदिष्टम् अस्ति । निधेः अधिगमः - निध्याधिगमो अर्थात् अज्ञातस्वामीकस्य भूमौ निखातस्य हिरण्यादेः प्राप्तिः तत् धनं राज्ञः भवति । परन्तु बहुश्रुतब्राह्मणः लभते-चेत् तद् धनं तस्यैव भवति न तु राज्ञः । प्रसङ्गेऽस्मिन् गौतमेन स्वाभिमतं प्रतिपाद्य अन्येषां अपि मतं प्रदर्शितम् । यथोक्तं अब्राह्मणोऽपि यदि निधेः सूचनां प्रकटीकरोति तर्हि निधेः षष्ठं भागं गृह्णीयात् । एवमेव गौतमेन राज्ञः शुल्क ग्रहणविधिः प्रतिपादितः ।

| **बोधप्रश्नाः** |
|---|
| १. शुल्कशब्दस्य कोऽर्थः ? |
| |
| |
| २. बलिः - इत्यस्य कोऽर्थः ? |
| |
| |
| ३. किं नाम पण्यम् ? |
| |
| |
| ४. मूलफलादिद्रव्याणां विक्रये कियान् शुल्कः ? |

| |
|---|
| |
| |
| ५. निधिः – इत्यस्य कोऽर्थः ? |
| |
| |

**राजधर्मः**

गौतमेन वर्णाश्रमधर्मरक्षकस्य राज्ञः धर्माः प्रतिपादिताः । धर्मशास्त्रे प्रतिपादितेषु षट्षु स्मार्तधर्मेषु यः गुणधर्मः इति कथ्यते सः राजधर्मनाम्ना प्राथितः । राज्ञः अभावे सर्वे स्थातुं नैव प्रभवन्ति । अतः क्षत्रियविशेषः राजा भवितुमर्हति । क्षत्रियः राजा भवेदिति मनुना कथितं, परन्तु गौतमेन क्षत्रियाभावे अन्योऽपि जनानां पालने समर्थो भवति इति प्रतिपादितम् । राज्ञः प्रजापालनं परमं कर्त्तव्यमिति तत्रैव कथितम् । राजा सर्वथा साधुवादी साधुकारी च स्यात् । तथा च वेद- विद्यादिषु निपुणो भवेत् । अत एव गौतमेन कथितं यत् – त्रय्यां तर्कविद्यायां च निष्णातः भवेत् । तथा च स्नानादिना इन्द्रियजयेन च बाह्याभ्यन्तर शुचिः स्यात् । प्रजासु राजा पक्ष-पात रहितः स्यात् । प्रजानां शिक्षा शौच स्वास्थ्य धर्म सम्पदादि वृद्धये सर्वथा यत्नं कुर्यात् । विद्या-वृद्धैः ब्राह्मणैः सह व्यवहारदर्शनं कुर्यात् । स्ववर्णात् स्वआश्रमात् वा चलतान् अर्थात् भ्रंशितम् उद्यमरतान् स्वधर्मे राजा स्थापयेत् । यतः स्वधर्मे स्थापनं राज्ञः परमं कर्त्तव्यम् इति धर्मशास्त्रकारैः कथितम् । अत एव राजा धर्मस्य अंशभाग् भवेति इति कथ्यते । अन्यथा पापभाग् भवति इति ज्ञायते । राजा ब्राह्मणमेव पुरोहितं कुर्यात् । किंम्भूतं ब्राह्मणं इति जिज्ञासायां गौतमेन कथितं यत् विद्यादिभिः विशुद्धकुलादिभिः यः युक्तः स एव पुरोहितरूपेण राज्ञा नियुक्तव्यः । तत्राऽपि अध्ययनादितपःपरायणयुक्तब्राह्मणस्योपदेशः राज्ञा ग्राह्यः । अत एव गौतमेन उपदिष्टम् यत् ब्राह्मणेन अनुज्ञातं क्षत्रम् अर्थात् राजा समृद्धो भवति इति । अतः तत् प्रसूतः कर्माणी कुर्वीत इति । श्रुतिस्मृतिपुराणदिशास्त्रेषु अभिज्ञः ब्राह्मणः यथार्थं वक्तुमर्हति । राजा ज्योतिर्विदां दैवोत्पातविदां च उपदेशानुसारं कर्म कुर्यात् । यतः अलब्धस्य लाभः योगः, लब्धस्य परिरक्षणं क्षेमः तदधिनम् इति केचन स्वीकुर्वन्ति इति गौतमेन कथितम् । प्रसङ्गेऽस्मिन् गौतमेन पुरोहितसाध्यानि कर्माणि प्रतिपादितानि यथा – ग्रह शान्ति होमः आयुष्यादि वृद्ध्यर्थं दूर्वाहोमः गृहप्रवेसादौ वास्तुहोमः तथा वशीकरणार्थं कर्मविशेषः शत्रूणां विनाशार्थं कर्मविशेषाश्च पुरोहितेन राज्ञा सम्पादनीयाः । राजा

वेदवेदाङ्गादिज्ञानेन लोकमर्य्यादां स्थापयेत् इति गौतमेन उपदिष्टम् । वेदादिऽविरुद्धाः देशधर्मादयः धर्मे प्रमाणं अर्थात् तदनुकुलाः प्रमाणं विरस्तु न प्रमाणम् इति गौतमेन कथितं कृषकादयः अर्थात् ये कृषिजीविनः ये च व्यवसायिनः ये च गोपालादयः स्वर्णकारादयः ते प्रत्येकशः स्व स्व क्षेत्रे प्रमाणभूताः भवन्ति । राजा न्यायस्य अधिगमे अर्थात् यथार्थ तत्त्वस्य लाभाय तर्कः आश्रयणीयः । विप्रतिपत्तौ अर्थात् सभ्यानां परस्परविरोधेन अर्थनिष्पतौ, शास्त्रवृद्धेभ्यः मतं गोपनेन नीत्वा राजा विचारं कुर्यात् । यतः राजा धर्मानुसारं निर्णयं कुर्यात् इति उपदेशः धर्मशास्त्रकारैः प्रदत्तः । गौतमेन प्रसङ्गेऽस्मिन् कथितं यत् – ''ब्रह्मक्षत्रेण सम्पृक्तं देवपितृमनुष्यान् धारयतीति विज्ञायते''। एवं राजा दुष्टानां कृते दण्डविधानं कृत्वा दमनं कुर्यात् । यतः दमनात् दण्ड इति कथ्यते । तेन दण्डेन राजा असाधून् दमयेत् । दण्डस्तु विविधः, तत्र लक्ष्यं अनुसृत्य दण्डः प्रजुज्यः । मनुना कथितं यथा – ''वाग्दण्डं प्रथमं कुर्याच्छिग्दण्डं तदनन्तरम् । तृतीयं धनदण्डं तु वधदण्डमतः परम्'' । अत्र उत्तम-मध्यम-अधमसाहासभेदेनापि धनदण्डः भिद्यते । अत एव ब्राह्मणः उपदेशेन, राजा दण्डेन, च प्रजानां अर्थात् वर्णानां आश्रमाणां च रक्षणं कुर्य्यात् इति । एतदर्थं राजा आचार्यश्च हितसाधकत्वात् अनिन्द्यौ भवतः इति ।

| **बोधप्रश्नाः** |
|---|
| १. कथं राजा धर्मस्य अंश-भाग् भवति ? |
| |
| |
| २. योग शब्दस्य कोऽर्थः ? |
| |
| |
| ३. क्षेमः इत्यस्य कोऽर्थः ? |
| |
| |
| ४. न्यायाधिगमे कः उपायः ? |
| |
| |
| ५. दण्डशब्दस्य का व्युत्पत्तिः ? |

## वर्णानां–दण्डप्रयोगप्रकारः वृद्धिव्यवस्था च -

गौतमेन राजधर्मप्रतिपादनानन्तरं वर्णानां कृते दण्डप्रयोगप्रकारः प्रदर्शितः । शूद्रः द्विजातीन् अभिसन्धिपूर्वकं वाक्–पारूष्येण दण्डपारूष्येण वा पीडयित्वा भत्सयित्वा प्रहृत्य च येन अङ्गेन पीडयेत् तेन द्विजपीडकेन अङ्गेन स वियोज्यो भवति । अर्थात् द्विजपीडकं अङ्गं छेदयेत् इति । ब्राह्मणादिनां स्त्रीणां गमने वधदण्डः राज्ञा प्रदातव्यः । ब्राह्मणस्य आक्रोशे क्षत्रियः शतं पणान् दण्ड्यः । बैश्यः ब्राह्मणस्य आक्रोशे अर्द्धेन अधिकशतं दण्ड्यः । शूद्रे आकृष्टा ब्राह्मणः न किञ्चित् दण्ड्यः । अपहरणे चौर्य्य धनस्य अष्टगुणं राज्ञा दण्डरूपेण ग्रहणीयम् । अत्र राजा धनस्वामिने एकगुणं दत्वा स्वयं सप्तगुणं गृह्णीयादिति परिकल्पितं, फलादिनां स्ते ये पञ्चकृष्णलं दण्डयेत् । गवादिना पशुना पीडितेक्षेत्रे पशुस्वामिनः दोषः । परन्तु यदि पशुस्वामिना पशुरक्षकः नियुक्तः तर्हि तस्य एव दोषः स्यात् न तु पशुस्वामिनः । मार्गसमीपे आवरणरहिते क्षेत्रे यदि पशुः शस्यादीनि भक्षयति तर्हि पालक्षतिकयोः द्वयोः दोषः । यदि आवृत्तक्षत्रे गौः भक्षयति तर्हि तत्र पञ्चमाषा राजदण्डः, अश्वखरादिषु षट्माषादि दण्डः । अश्व महीष्योः दशमाषा दण्डः । छागमेषादिषु द्वौ द्वौ मासौ दण्डः, परन्तु सम्पुर्णविनाशे यावत् क्षेत्रोत्पन्नोफलं लभ्यते तावत् एव दण्डः गोतमेन प्रदर्शितः शास्त्रविहितस्य अकरणे प्रतिषिद्ध सेवायां च अन्नवस्त्रादिरिक्तं धनापहरणं राज्ञा कर्त्तव्यं इति प्रोक्तम् । कुसीदे वृद्ध्यर्थं धनं प्रज्युज्यते । तत्र प्रति मासं पञ्च मासिकी वृद्धिः ग्राह्या । तत्रापि यावता कालेन प्रयुक्तं धनं वृद्धिसहितं द्विगुणं भवति ततोधिकालस्थितावपि द्वैगुण्यमेव भवति न ततोऽधिकमिति । गौतमेन आधिः भोग्यगोप्य भेदेन द्विधा इति कथितम्। भोग्याधिः भुक्ताधिः इति कथ्यते । भुक्ता उत्तमर्णेण गृहीता भूम्यादेः, फलरूपावृद्धि र्यस्मिन् सः आधिरिति स न वर्द्धते, महतापि कालेन प्रयुक्तं धनमधिकं न भवति । आधेर्बन्धकमिति बन्ध इति च नामान्तरे । गोप्याधौ सवृद्धिकं धनं दित्सतः दातुमिच्छतश्च अवरुद्धस्य सम्प्रति न दीयतां परतो नेष्यामीत्यादिरूपेण वारितस्य अधमर्णस्य गृहीतं धनं न वर्द्धते । दित्साकाले यावत् परतस्तु तावदेव इति सूक्ष्मटीकाकारेण स्पष्टीकृतम् ।

वृद्धेरपि यत्र वृद्धिर्भवति तत् चक्रवृद्धिरिति कथ्यते । कालेन यत् वर्धते तत् कालवृद्धिः इति कथ्यते तत्र द्विगुणात् अधिकं गृह्यते । ऋणिना कृता वृद्धिः करीता इति

कथ्यते । दोहवाहनादिना कायशोध्या कायिका इति कथ्यते । यत्र वृद्धि प्रत्यहं गृह्यते सा शिखा वृद्धिः इति कथ्यते । पशूपजादिषु महता कालेनापि कुसीदं पञ्चगुणं नातिक्रमति । धृतक्षीरादि पशोरूपजातम् इति कथ्यते । गौतमेन रिक्थभाज ऋणं प्रतिकुर्य्युः इति कथितम् । परन्तु मद्यद्यूतदण्डादिषु पितृकृतानि ऋणानि पुत्राः न परिशोधेयुः । एवमेव गौतमेन वृद्धिव्यवस्था निरूपिता ।

| **बोधप्रश्नाः** |
|---|
| १. पशुपीडिते कः दोषभाग् भवति ? |
| |
| |
| २. पशुरक्षके नियुक्ते कः दोषभाग् ? |
| |
| |
| ३. अनावृत्तशष्यक्षेत्रे हानौ कयोः दोषः गौतमेन कथितः ? |
| |
| |
| ४. किं नाम कुसीदम् ? |
| |
| |
| ५. करिता इत्यस्य कोऽर्थः ? |
| |

## सारांशः -

प्रियपाठकाः ! अस्मिन् खण्डे को नाम – आपात्कल्पः इति प्रतिपाद्य आपदि ब्राह्मणादि– वर्णानां को धर्मः इति विचारितम् । तत्र आपद्ग्रस्तः बहुकुटुम्बीतया कथं जीवेत् इति सम्यक् प्रतिपाद्य राज्ञः वहुश्रुतब्राह्मणस्य समाजे कीदृशी भूमिका विद्यत इति आलोचितम् । तत्र बहुश्रुतब्राह्मणस्वरूपनिरूपणप्रसंगे संस्काराणाम् प्रतिपादनं कृत्वा अष्टौ आत्मगुणाः प्रतिपादिताः । अस्मिन् खण्डे ब्राह्मणादिवर्णानां जीविकाग्रहणोपायाः प्रतिपादिताः । ततः राज्ञः कर्त्तव्यं विविच्य संग्रामादिषु विजयलब्धधनविभागे विधिः निरूपितः । तदनु राज्ञः शुल्कग्रहणविधिं प्रदशर्य राजधर्माः प्रतिपादिताः । तत्र राजा – वर्णानां कृते दण्डप्रयोप्रकारं कथं कुर्यादिति विचारितम् । ततः वृद्धिव्यवस्था विचारिता । एते विषयाः खण्डेऽस्मिन् प्रतिपादिताः सन्ति ।

**पारिभाषिकशब्दाः –**

कल्पः – विधिः
वशा – बन्ध्या शौः
वेहत् – गर्भधातिनि गौः
अपथ्यम् – विषादिः
वाकोवाक्यम् – प्रश्नोत्तररूपम्
अस्पृहा – सन्तोषः
आग्रहायणी – मार्गशीरपूर्णिमा
पुसंवनम् – गर्भस्य पुंसीकरणम्
परिवादः – दोषकीर्त्तनम्
शाणः – औषधिविशेषः
औषधम् – पिप्पलादि
याजनम् – श्रौतस्मार्त्तादिकर्मसम्पादनम्
कुसीदम् – बृद्ध्यर्थं धनप्रयोगः
परिग्रहः – अनन्यपूर्वस्य द्रव्यस्य स्वीकारः
अधिगमः – निध्यादेः प्राप्तः
शूद्रः – चतुर्थोवर्णः
आन्वीक्षिकी – तर्कविद्या
योगः – अलब्धस्य लाभः

| | | |
|---|---|---|
| क्षेमः | – | लब्धस्य परिरक्षणम् |
| आक्रोशः | – | उच्चैर्भाषणम् |
| अधिः | – | बन्धकम् |
| कारिता | – | ऋणिना कृता बृद्धिः |
| कायिका | – | दोहनवाहनादिना कायशोध्या |
| शिखाबृद्धिः | – | यत्र बृद्धिः प्रत्यहं गृह्यते सा |

**आदर्शप्रश्नाः –**

**निबन्धात्मकप्रश्नाः** – (प्रत्येकं २०/१५ अङ्काः)

१. आपद्धर्मान् यथाग्रन्थं प्रतिपादयत ।

२. गौतमोक्तदिशा संस्कारान् विवेचयत ।

३. स्नातकस्वरूपं तद्धर्मांश्च प्रतिपादयत ।

४. सांग्रामिकवित्तविभागप्रकारं यथाशास्त्रं प्रतिपादयत ।

५. राज्ञः शुल्कग्रहणविधिं विवेचयत ।

६. राजधर्मान् गौतमोक्तदिशा लिखत ।

**विश्लेषणात्मकप्रश्नाः** – (प्रत्येकं १२/१० अङ्काः)

१. वैश्यवृत्त्याजीवतो ब्राह्मणस्य – कानि अपण्यानि ।

२. स्नातकः कानि वर्जयेत् ? यथाग्रन्थं प्रतिपादयत ।

३. आत्मगुणान् विमृशत् ?

४. बहुश्रुतब्राह्मणस्य स्वरूपं प्रतिपादयत ।

५. ब्राह्मणादिवर्णानां जीवनोपायान् निर्दिशत ।

६. राज्ञः दण्डप्रयोगप्रकारं विवेचयत ।

७. पुरोहितलक्षणं विलिख्य तत्कार्यञ्च प्रदर्शयत ।

८. वृद्धिभेदान् विलिख्य वृद्धिव्यवस्थां निर्दिशत ।

**लघुप्रश्नाः** – (प्रत्येकं ५ अङ्काः)

टिप्पणी प्रदेया –

१. गृहस्थस्यापत्कल्पः, २. उपनयनम्, ३. अष्टकाः, ४. सीमन्तोन्नयनम्, ५. चूडाकर्म, ६. सोमसंस्थाः, ७. द्विजातीनां कर्माणि, ८. सत्वहेतवः, ९. राजगुणाः, १०. स्तेनः, ११. आधिः, १२. पुरोहितसाध्यानि कर्माणि ।

**एकाङ्कप्रश्नाः** – (प्रत्येकं १ अङ्कः)

१. कल्पः इत्युक्ते कोऽर्थः ?
२. किं नाम याजनम् ?
३. किं नाम अपण्यम् ?
४. कौ राज्ये अनिन्द्यौ ?
५. गौतममते कति संस्काराः ?
६. वेदाङ्गानि कति ?
७. कति वेदव्रतानि ?
८. कति सोमसंस्थाः ?
९. कति आत्मगुणाः ?
१०. योगः इत्यस्य कोऽर्थः ?
११. परिवादः इत्यस्य कोऽर्थः ?
१२. किं नाम कुसीदम् ?
१३. प्रतिग्रहः इत्यस्य कोऽर्थः ?
१४. किं नाम सांग्रामिकम् ?
१५. का नाम त्रयी ?
१६. कः दैवचिन्तकः ?
१७. कथं राजा धर्मस्य अंशभाग् भवति ?
१८. राज्ञः प्रधानं कर्म किम् ?
१९. को नाम उपनिधिः ?
२०. को नाम अन्वाधिः ?
२१. पशुपीडिते कस्य दोषः गौतमेन कथितः ?
२२. न्यायाधिगमे कोऽभ्युपायः ?

**एकाङ्कप्रश्नानामुत्तराणि** – १. विधिः, २. श्रौतस्मार्त्तादिकर्मसम्पादनम्, ३. अविक्रेयम् (विक्रयायोग्यम् वा), ४. राजा-बहुश्रुतश्च, ५. चत्वारिंशत्, ६. षट्, ७. चत्वारि, ८. सप्त, ९. अष्टौ, १०. अलब्धस्य लाभः, ११. दोषकीर्त्तनम्, १२. बुद्ध्यर्थं धनप्रयोगः, १३. दानग्रहणम्, १४. संग्रामलब्धं वित्तम्, १५. ऋग्यजुःसामवेदाः, १६. ज्योतिर्विद्, १७. वर्णाश्रमादीन् राजा धर्मे स्थापयति, १८. शस्त्रधारणपूर्वकं प्रजानां रक्षणम्, १९. यत्र विश्वासात् अगणितं धनं निक्षिप्यते, २०. निक्षिप्तं धनं यदि न्यासधारी अन्यत्र निक्षिप्यते तत्, २१. स्वामिदाषः, २२. तर्कः ।

❖❖❖

## (UNIT - III)
## द्वितीयप्रश्नस्य चतुर्थाध्यायात् नवमाध्यायं यावत्

### प्रस्तावना –

धर्मशास्त्रे प्रमुखरूपेण प्रतिपादितेषु विषयेषु व्यवहारस्य महत्त्वं चानस्वीकार्यम् । व्यवहारेण दुष्टशिष्टानां निर्णयो भवति । दुष्टानां दमनं विधाय राजा शिष्टानां परिपालनमपि करोति। अतएवोक्तं यत् राजा विद्वद्भिः सह व्यवहारं पश्येदिति । व्यवहारो नाम आत्मसम्बन्धितयाऽपरस्य विरोधेन कथनम् । वादिप्रतिवादिनोरूक्तिप्रत्युक्त्योर्मध्ये विप्रतिपत्तौ परस्परविरोधे जाते, राजा निर्णायार्थं प्रमाणस्यावश्यकतामनुभवति । अतः सत्यस्योद्घाटनाय राज्ञा सत्यव्यवस्था साक्षिनिमित्ता इति परिकल्पितम् । अतः साक्षिस्वरूपादिनिरूपणं खण्डेऽस्मिन् गौतमोक्तदिशा प्रतिपादितम् । ततः वर्णाश्रमधर्मं राजधर्मं च प्रतिपाद्य तदधिकारसंकोचहेतुभूतमशौचं गौतमेन विवेचितम् । तत्र ब्राह्मणादिवर्णानां शावमाशौचं - जननाशौचं - गर्भस्रावादि - अशौचं - अशौचसन्निपातादिकं - सर्वं संक्षेपणात्र प्रतिपादितं विद्यते । तथा च परलोकगमतानां पितॄणामुद्देश्येन क्रियमाणं श्राद्धमपि खण्डेऽस्मिन् निरूपितम् । धर्मसूत्रकारेण गौतमेन ब्रह्मचर्यव्रतं प्रतिपादितम् । तत्र ब्रह्मचारी श्रावणपूर्णिमां भाद्रपूर्णिमां वारभ्य वेदाध्ययनं कुर्यात् । अध्ययनेऽपि केचन नियमाः विधिनिषेधमुखेन कथिताः । तेषां पालनं सर्वथा ब्रह्मचारिणा कर्त्तव्यम् । अत एव विस्तृतरूपेण अनध्यायाः गौतमेन प्रदर्शिताः । ततः ब्राह्मणः कुत्र प्रतिग्रहं भोजनं वा कुर्यादिति तेन उपदिष्टम् । प्रसंगेऽस्मिन् तेनैव भोज्यद्रव्याणि अभोज्यद्रव्याणि च पुरस्कृतानि । येन भक्ष्याभक्ष्यविषये सम्यक् ज्ञानं प्राप्यते । ततः स्त्रीधर्मप्रतिपादनमपि कृत्वा आपद्धर्माः संक्षेपेण प्रदर्शिताः ।

### उद्देश्यकथनम् -

- साक्षिस्वरूपं तद्भेदान् साक्ष्यग्रहणं स्वतः च ज्ञातुं प्रभेदः ।
- शावाशौचं ज्ञातुं प्रभवन्ति ।
- जननाशौचं स्रावाशौचं च निरूपयितुं शक्नुवन्ति ।
- श्राद्धस्वरूपं श्राद्धकालद्रव्यादिविषयान् विचारयितुं प्रभवन्ति ।
- पङ्क्तिपावनान् निर्णेतुं शक्नुवन्ति ।

- ब्रह्मचर्यव्रतम् अध्ययनकालान् अनध्यायान् चालोचयिष्यन्ति ।
- ब्राह्मणस्य भोजनविधिं प्रतिग्रहबिधिं च निरूपयिष्यन्ति ।
- स्त्रीधर्मान् - आपद्धर्मान् च ज्ञातुं प्रभवन्ति ।

## साक्षिव्यवस्था -

व्यवहादर्शने वादिप्रतिवादिनोरुक्तिप्रत्युक्तिकाले परस्परविरोधे जाते विप्रतिपत्तौः सत्यनिर्णयाय साक्षिव्यवस्था धर्मशास्त्रकारैः परिकल्पिता । साक्षाद्दर्शनात् श्रवणाच्च साक्षीति कथ्यते । नारदेन साक्षी एकादशविधः इति प्रोक्तम् । ते च साक्षिणः स्वकर्मसु अनिन्दिताः स्युः। राज्ञः विश्वासयोग्याः भवेयुरित्यर्थः । ते च साक्षिणः वादिप्रतिवादिनोरन्यतरस्मिन् पक्षे प्रीतिशून्याः क्रोधशून्याश्च भवेयुः । ब्राह्मण-क्षत्रिय-वैश्य-साक्ष्यभावे पूर्वलक्षणलक्षिताः दोषमुक्ताः शूद्रा अपि साक्षिणः कार्या, न तु निर्गुणा दोषयुक्ता ब्राह्मणाः । अब्राह्मणस्यार्थिनः ‘‘अयं मम साक्षी इति वचनात्’’ ब्राह्मणः साक्षित्वेन राज्ञा बलाद् न अवरोद्धव्यः । यदि - लेख्यकाले निबद्धसाक्षी भवति, तर्हि अवश्यं साक्ष्यप्रदानं कुर्यादिति गौतमेन कथितम् । अत्र ब्राह्मणः इति कथनेन श्रोत्रियस्य ग्रहणं भवति । नारदेनापि कथितं यत् - ‘‘श्रोत्रियास्तापसा वृद्धा ये च प्रव्रजिता नराः । असाक्षिणस्ते वचनानात्र हेतुरुदाहृत इति ।।’’ साक्ष्यदानकाले साक्षिणः पृष्टाः सन्तः अविरामशब्दप्रवाहेण प्रसंगानुसारं ब्रूयुः न तु कुण्ठिततया । अवचने अन्यथा अप्रासंगिकवचने साक्षिणः दण्ड्याः भवन्ति । साक्षिणां सत्यस्य प्रकाशने स्वर्गलाभः, मिथ्याकथने नरकपातः इति गौतमेन निरूपितम् । हिंसादिसाहसकृतकार्येषु साक्ष्य-साक्ष्यादिलक्षणपरीक्षादि नास्ति । तत्र यः द्रष्टा श्रोता वा स एव साक्षी । तत्र साक्षिपरीक्षा नास्त्येव । यदि साक्षी अनवहिततया किमपि ब्रूते तदा तद्वचनं न प्रामाण्यम् । प्रकृतिस्थत्वेन यदुच्यते तत् ग्राह्यम् । धर्मतन्त्रपीडायां साक्ष्यादयः दोषभाजः भवन्ति । यथोक्तं मनुना -

‘‘पादौ धर्मस्य कर्त्तारं पादः साक्षिणमृच्छति ।
पादः सभासदः सर्वान् पादो राजानमृच्छति ।।’’

शपथविधिना सत्यनिर्णयं कुर्यादिति केचन - आचार्याः मतमुपस्थापयन्ति । शपथकर्म - अब्राह्मणानां देवानां पुरतः विचारसभायां भवेत् । छागमेषादि-क्षुद्रपशुविषये मिथ्यासाक्ष्यप्रदाने साक्षी दश पशून् हन्ति । गोविषयके अनृते भाषणे गोशतहत्यादोषभाग् भवति साक्षी । अश्वविषये मिथ्यासाक्ष्यदाने अश्वसहस्रहत्यादोषं, पुरुषविषये मिथ्यासाक्ष्यदाने दशसहस्रपुरुषहत्यादोषं, भूमिविषये मृषासाक्ष्यदाने

लक्षपुरुषहत्यादोषं प्राप्नोति साक्षी । भूमिविषये अनृतसाक्ष्यदाने सकलपृथिवीहरणदोषभाग् वा भवति साक्षीति गौतमेन कथितम् । परकीयभूमिहरणे नरकगामी भवति हर्त्ता । मैथुनादिविषये मिथ्यासाक्ष्यदाने भाषणे वा भूमिवत् अपराधः गौतमेन प्रदर्शितः । मधुघृतादिविषये पशुवत् अपराधः कथितः । मिथ्यासाक्ष्यप्रदाने साक्षी निन्द्यः दण्ड्यश्च राज्ञा भवतीति । राजा स्वयं प्राड्विवाको भवेत् । अथवा शास्त्रवित् ब्राह्मणो प्राड्विपाको भवेत् । पृच्छतीति प्राट्, विविच्य वक्तीति विवाकः, प्राट् चासौ विवाकश्चेति प्राड्विवाकः निर्णायकः इति कथ्यते । वादिप्रतिवादिपक्षयोः सत्यमिथ्यानिर्णये संबत्सरं प्रतिक्षेत । परन्तु धेन्वादिसंयुक्ते व्यवहारे जाते शीघ्रं निर्णयं कुर्यात् । तत्र संवत्सरं न प्रतीक्षेत । अन्ते गौतमेन साक्ष्यप्रदानकाले सत्यस्य उपस्थापनं सर्वेभ्यः धर्मेभ्यो गरीयः इति उल्लिख्य साक्ष्यव्यवस्थायाः महत्वं वैशिष्ट्यञ्च सर्वथा प्रतिपादितम् ।

| **बोधप्रश्नाः** |
|---|
| १. कदा साक्षिव्यवस्था राज्ञा ग्राह्या ? |
| |
| |
| २. कः साक्षीति कथ्यते ? |
| |
| |
| ३. साक्षी सत्यवचने किं प्राप्नोति ? |
| |
| |
| ४. प्राड्विपाकः इत्यस्य का व्युत्पत्तिः ? |
| |
| |
| ५. कस्मिन् विषये राजा शीघ्रं निर्णयं कुर्यात् ? |
| |

## सारांशः -

वादिप्रतिवादिनोरुक्तिप्रत्युक्तिसमये अन्योन्याक्षेपे जाते सत्यस्योद्घाटनाय साक्षिव्यवस्था धर्मशास्त्रकारैः विहिता । अतएव कथितं यत् यः प्रत्यक्षरूपेण पश्यतिश्रुणोति च सः साक्षीति । स च नारदेन एकादशविधः प्रोक्तः । कः कदा कस्य साक्षीभवेदिति अत्र प्रतिपादितम् । तथा च प्राणहिंसादिसाहसकर्मसु नियमः नास्ति, यः कोऽपि आगत्य यत् प्रत्यक्षीकृतं – तत् प्रकाशयेत् । अनृतभाषणे दोषः नरकगमनञ्च प्रतिपाद्य गौतमेन सत्यवचने स्वर्गप्राप्तिरिति कथितम् । एवमेव साक्षिव्यवस्था व्यवहारदर्शने सर्वथा अपेक्ष्यते इति – प्रतिपाद्य धर्मतन्त्रपीडायां राज्ञः तथा अन्येषामपि समुपस्थितानां सर्वेषां दोषो भवतीति कथितम् ।

## शावाशौचम् -

वर्णाश्रमधर्मं – गुणधर्मं चोक्त्वा गौतमः तदधिकारसंकोचहेतुभुतमशौचं प्रदर्शितवान् । तच्चाशौचं प्रमुखरूपेण त्रिविधं भवति । यथा – शावा-शौचम्, जननाशौचस्त्रावाशौचश्चेति । शवस्येदं शावमाशौचं नाम मरणाशौचं सपिण्डानां दशाहं यावत् पालनीयम् । सपिण्डाश्च – आत्मानमारभ्य उपरितनसप्तमादधस्तनसप्तमपर्यन्ता अन्वयाः । सामान्येन अशौचं सर्वेषां सपिण्डानां भवति । परन्तु ऋत्विगादीनां न भवति ऋत्विजो ये यज्ञकर्मणि वृत्ताः सन्तः यज्ञादिकर्म सम्पादयन्ति । दीक्षितः अर्थात् यजमानः, ब्रह्मचारी नाम यः उपनयनसंस्कारेण संस्कृतो भूत्वा गुरुकुले विद्याध्ययनादिकर्म कृत्वा तिष्ठति सः, एतेषां कृते अशौचं नास्ति । वर्णभेदेनापि अशौचव्यवस्था गौतमेन कथिता । यथा ब्राह्मणस्य दशरात्रम्, क्षत्रियस्य एकादशरात्रम्, वैश्यस्य द्वादशरात्रम्, केचन अर्द्धमासमर्थात् पंचदशरात्रम्, शूद्रस्य मासं यावत् अशौचं पालनीयं भवतीति । तत्रापि समानजातीयं शावाशौचं, जननाशौचं वा – यदि पूर्वाशौचस्य मध्ये पुनः भवेत् तर्हि पूर्वाशौचस्य भोगावशिष्टेन समयेन सपिण्डाः शुद्धाः भवन्ति । गौतमेन प्रसङ्गेऽस्मिन् इदमपि कथितं यत् – सजातीयस्वल्पाशौचमध्ये यदि दीर्घाशौचपाते तत्र न पूर्वाशौचेन शुद्धिः कल्पनीया । परन्तु स्वल्पाशौचेऽपि शावे जननाशौचं लघु दीर्घं वा पतेत् तत्र पूर्वाशौचेन शुद्धिः । प्रसङ्गेऽस्मिन् इदमपि कथितं यत् – रात्रिमात्रावशेषे अर्थात् ब्राह्मणस्य दशमदिवसे, क्षत्रियस्य एकादशदिवसे तथा अन्येषां वर्णानां अन्तिमदिवसे यदि अशौचे आगते द्वाभ्यां रात्रिभ्यामधिकाभ्यां अर्थात् ब्राह्मणः त्रयोदशाहोरात्रात्मकम् अशौचं प्रपाल्य शुद्ध्यतीति । एवमन्येषाम् । परन्तु यस्य पिता पूर्वाशौचमध्ये मृतः स न शुद्धयतीति सूक्ष्माटीकाकारेण स्पष्टीकृतम् ।

गवा ब्राह्मणेन वा हतानां कृते शवसंस्कारपर्यन्तम् अशौचं पालनीयम् । राजक्रोधात् मृतानां युद्धे हतानां च कृते सद्यः शौचं गौतमेन कथितम् । महाप्रस्थानं कृत्वा अनशनं कृत्वा जल-विष-शस्त्रप्रभृतिभिः द्वारा यः स्वेच्छया मृत्युमधिगच्छति तेषां कृते सद्यः शौचं पालनीयम् । परन्तु अनिच्छतां अर्थात् प्रमादमृतानां कृते अशौचं विद्यते । आत्मानमारभ्य अधस्तात् सप्तमपुरुषानन्तरं पिण्डनिवृत्तिः भवतीति गौतमेन कथितम् । ''सप्तमे पिण्डनिवृत्तिः'' इति । पंचमे तु पिण्डनिवृत्तिः न भवति इति सूक्ष्माटीकाकारस्याभिप्रायः । एवमेव शावाशौचव्यवस्था विहिता ।

| **बोधप्रश्नाः** |
|---|
| १. किं नाम अशौचम् ? |
| |
| |
| २. क्षत्रियस्याशौचं कति दिनात्मकम् ? |
| |
| |
| ३. युद्धे हतानामशौचं किमात्मकम् ? |
| |
| |
| ४. पिण्डनिवृत्तिः कदा भवति ? |
| |

## जननाशौचं स्रावाशौचश्च -

पूर्वप्रतिपादिते शावाशौचे यदुक्तं तत् जननाशौचेऽपि पालनीयम् । परन्तु जननाशौचे मातापित्रोः अर्थात् जन्मितस्य शिशोः जननीजनकयोः साक्षात् सम्बन्धवशात् अस्पृश्यत्व-लक्षणमशौचं भवति । कर्मानधिकाररूपमशौचं तु दशरात्रादि सर्वेषां वर्णानां भवतीति गौतमेन प्रतिपाद्य गर्भस्य स्रंसने अर्थात् अपप्रसवे

गर्भग्रहणस्य यावन्तो मासाः तदा जाताः तावत् परिमितानि अहोरात्राणि अशौचरूपेण पालनीयानि भवन्ति, अथवा विकल्परूपेण त्रिदिनाशौचं सामान्यरूपेण उपदिष्टम् । गौतमेन जननाशौचविषये मरणाशौचवदिति प्रतिपाद्य अभिसन्धिपूर्वकं प्रेतोपस्पर्शने दशरात्रमाशौचं पालनीयमिति कथितम् । वैश्यशूद्रविषये मरणाशौचे यदुक्तं तदत्रापि ग्राह्यम् । विकल्परूपेण ब्राह्मणादीनां प्रेतोपस्पर्शने त्र्यहाशौचमपि यदुक्तं तत् सामान्यरूपेण इति मन्तव्यम् । आचार्य तत् पुत्रादिषु मृतेषु त्र्यहाशौचम् । सजातीयशवस्पर्शं प्रतिपाद्य गौतमः विजातीयशवस्पर्शमपि उक्तवान् । यज्जातीयं शवं यः स्पृशेत्, सः तज्जातीयम् अशौचं पालयेत् । शवस्यानुगमने सवस्त्रस्नानं शुद्ध्यर्थं विहितम् । कृतचूडस्य प्रेतस्य उद्देश्येन उदकदानं कर्त्तव्यम्, उदकदाने कर्त्तव्ये दाहोऽपि कर्त्तव्यः । अत्र गौतमेन इदमपि कथितम् यत् – कृतचूडानां कन्यानामपि दाहः उदकदानं च कर्त्तव्यम् । अशौचे सर्वे ज्ञातयः अधःशय्यासनिनः भवेयुः । ब्राह्मचर्यं च पालयेयुः । केशश्मश्रुनखादिधारणपूर्वकं तैलादिग्रहणं न कुर्युः । मृताहमारभ्य प्रथम–तृतीय–सप्तम–नवमदिवसेषु उदकक्रिया कर्त्तव्या । उदकदानकाले परिहितवस्त्रत्यागोऽपि गौतमेन कथितः । बालादिनां कृते सद्यः शौचन्तु कथितमेव । प्रजारक्षणे वाधा उत्पद्येत इति शंकयां गौतमेन राज्ञः कृते सद्यः शौचं कथितम् । वेदाध्यायकस्य ब्राह्मणस्य कृतेऽपि इदमेव । एवमेव अशौचव्यवस्था गौतमेन प्रतिपादिता ।

| **बोधप्रश्नाः** |
|---|
| १. ब्राह्मणः जनने कतिदिनात्मकम् अशौचं पालयेत् ? |
| |
| |
| २. वालदीनां मरणे जाते कीदृशम् अशौचम् ? |
| |
| |
| ३. गर्भस्रावे अशौचं कियत् दिनात्मकम् ? |
| |
| |

## ब्रह्मचर्यव्रतम् – अध्ययनकालाः – अनध्यायाश्च

प्रतिवर्षं श्रावणपूर्णिमामारभ्य वर्षाकालिकं ब्रह्मचर्यव्रतं वेदाध्ययनरूपं व्रतं गृहस्वेनापि अनुष्ठेयम् । भाद्रपूर्णिमायां उपाकरणकर्म कृत्वा मन्त्रब्राह्मणात्मकं वेदं पठेत् । अत्र गौतमेन अपूर्वाधिगमो गृहीताभ्यासंश्च विहितः । अनेन सुस्पष्टं ज्ञायते यत् श्रावणपूर्णिमां भाद्रपूर्णिमां वारभ्य बेदाध्ययनं कुर्यादिति । अत्र अध्ययनमपि ऊर्द्धपञ्चमान् मासान्, पञ्च मासान्, सम्पूर्णं दक्षिणायनं वा इति पक्षत्रयं प्रदर्शितम् । परन्तु उपाकरणे श्रावणपूर्णिमाभाद्रपूर्णिमेति कालद्वयं सूचितम् । तत्रापि अध्ययनकाले स्त्रीसङ्गवर्जनं, केशनखश्मश्रुधारणं कुर्यात् । तत्र च मांसभोजनं सर्वथा वर्जयेत् । अत्र गौतमेन विकल्परूपेण मासद्वयात्मकः कालोऽपि ब्रह्मचर्यव्रतपालनाय विहितः । अध्ययनकालनिरूपणप्रसङ्गे गौतमेन अनध्यायाः प्रदर्शिताः । यथा – दिवसे वायौ पांशुहरे वाति सति अध्ययनं न कुर्वीत । परन्तु रात्रौ तादृशे वायौ सति अधीयित इति – गौतमेन प्रतिपाद्य रात्रौ कर्णश्राविणि भूते सशब्दे वायौ सति रात्रावपि नाधीयीतेति उपदिष्टम् । बाणादिशब्दं श्रुत्वा वीणामृदङ्गादिशब्दं वा श्रुत्वा मनसश्चञ्चलतया अध्ययनं न कर्त्तव्यम् । श्व-शृगाल-गर्दभादि समूहध्वनिं श्रुत्वा नाधीयित । इन्द्रधनुं वर्षर्त्तुभिन्ने ऋतौ मेघस्य वा दर्शनं कृत्वा अध्ययनं न कुर्यात् । सन्ध्यायां मध्यरात्रौ चाध्ययनं न कर्त्तव्यम् । केचन धर्मशास्त्रकाराः इदमपि वदन्ति यत् – वृष्टिजलं यदा गृहाच्छादनास्याद्योभागे भूमौ पतति तदापि अध्ययनं न कुर्युः । उत्पातसूचकमण्डले बृहस्पति-शुक्रयोः दर्शनेऽपि नाधीयित । भीतार्त्तोभूत्वा यानस्थो खट्वादौ शयनं कृत्वा उरौ पादं संस्थाप्य वा नाधीयित । शवदाहस्थाने ग्रामान्ते राजमार्गे अशौचसमयेऽपि अध्ययनं न कर्त्तव्यमिति गौतमेन उपदिष्टम् । तथा च दुर्गन्धयुक्तस्थाने चण्डालादिसन्निधाने अपि नाधीयीत । अम्लवमनदशायां सामगानध्वनिश्रवणदशायां च नाधीयीत । गौतमेन अनध्यायकाल-निरूपणावसरे कथितं यत् आकालिकानध्यायोऽपि विद्यते । यथा – यस्मिन् काले निर्घातादयः अर्थात् मेघगर्जनादयः भवन्ति परेद्युः तत् कालपर्यन्तम् आकाल इति कथ्यते । तत् संबद्धः आकालिकः, तत्राध्ययनं न कर्त्तव्यम्। यथा यदि रविवासरे सायम् अन्तरीक्षे ध्वनिः भवति तर्हि सोमवासरे सायं यावत् अनध्यायः पालनीयः, तथा भूमिकम्पे, सूर्यचन्द्रमयोः ग्रहणे उल्कापतने च आकालिकानध्यायः कथितः । अग्निहोत्रकाले मेधध्वनिं श्रुत्वा विद्युत्दर्शनं कृत्वा वा अध्ययनं न कुर्यात् । मूत्रोद्वेगयुक्ते पुरीषोद्वेगे जाते च नाधीयीत । वर्षर्तौ प्रातः यदि मेघध्वनिः विद्युत् वृष्टिः च भवेयुः तर्हि तदहः अनध्यायस्वरूपेण यापयेत् । यस्मिन् राज्ये यः निवसति तद्विषयस्थे राज्ञि प्रेते आकालिकोऽनध्यायः गौतमेन कथितः । सहाध्यायिनः यदा परस्परं विच्छिन्ना स्थानान्तरं गच्छेयुः, तदा प्रवासादागमनान्तरं

चित्तचापल्यवशात् सज्योतिरनध्यायः । चौरादिहेतुकः कोलाहले, गृहदाहे, वेदशाखासमाप्तौ, वमने, श्राद्धभोजने वा अहोरात्रमनध्यायः गौतमेन कथितः। अमावास्यायां चतुर्दश्यां प्रतिपादि च अनध्यायः निरूपितः । कार्त्तिकपूर्णिमायां फाल्गुनपूर्णिमायां आषाढपूर्णिमायां च अनध्यायः । मार्गशीर्ष–पौष–माघ–पूर्णिमाऽनन्तरं तिस्रः कृष्णाष्टभ्यः अष्टका भवन्ति । तत्र त्रिरात्रं त्रिरात्रम् अनध्यायः इति कथितम् । तथा च अष्टम्यां पूर्वेद्युः अर्थात् उपाष्टकायां परेद्युश्च अन्वष्टकायामपि अनध्यायः पालनीयः । केचन आश्विनकृष्णष्टमी अर्थात् अन्त्याष्टकायां सप्तम्यादि–दिनत्रये अनध्यायं कल्पयन्ति । वर्षा–विद्युत् मेघध्वनिः इति त्रयाणां युगपत् सन्निपाते त्रिरात्रमनध्यायः तत्रैव प्रदर्शितः । विवाहादिउत्सवमात्रे भोजनानन्तरं तदहरनध्यायः । मध्यरात्रे चतुर्मुहूत्तमनध्यायः । केचन आचार्याः नगरे दिवारात्रौ च अनध्यायं वदन्ति । अशुच्यवस्थायां मानसमध्ययनमपि वर्जयेत् । श्राद्धी–श्राद्धभोक्ता च अहोरात्रमनध्यायं पालयेत्, एतदतिरिच्य धर्मशास्त्रेषु यत्र यत्र अनध्यायान् स्पृतिकर्त्ताः प्रतिपादयन्ति तत्रापि अनध्यायः पालनीयः इति गौतमेन अनध्यायाः प्रतिपादिताः ।

| **बोधप्रश्नाः** |
|---|
| १. उपाकरणकर्म कदा कर्त्तव्यम् ? |
| |
| |
| २. आकालिकः इत्यस्य कोऽर्थः ? |
| |
| |
| ३. का अष्टका इति कथ्यते ? |
| |
| |
| ४. अष्टकाः कति ? |
| |

## ब्राह्मणस्य भोजनविधिः प्रतिग्रहविश्चि –

अध्ययनादिषु त्रिषु कर्मसु प्रशस्तानां द्विजातीनां गृहेषु ब्राह्मणो भुञ्जीत इति गौतमेन कथितम् । अत्र भुञ्जीत इति यदुक्तं तत् न विधित्वेन अर्थात् नियमविधिरूपेण

मन्तव्यम्, अपि तु परिसंख्याविधिविधानपूर्वकं नान्यत्र भुञ्जीत इति सूक्ष्माटीकाकारेण स्पष्टीकृतम् । ब्राह्मणस्य भोजनविषये न केवलं गौतमेन स्वाभिमतं प्रकटीतम्, अपि तु प्रतिग्रहविषयेऽपि कथितं यत् स्वकर्मसु प्रशस्तेभ्यः द्विजातिभ्यः अनिन्द्येभ्योऽपि द्विजेभ्यो ब्राह्मणः प्रतिगृह्णीयादिति । गौतमेन एतदतिरिच्य इदमपि उपदिष्टम्, यत् - परैः प्रीत्या प्रदत्तानि काष्ठ-जल-यवस-मधु-अभय-आसन-शय्या-गृह-क्षीर-दधि-क्षुद्रमत्स्यराजसर्षप-माला-प्रभृतिनी द्रव्याणि न प्रत्याख्येयानीति । पितृ-देव-गुरु-भृत्य भरणार्थमपि सर्वेभ्यः द्रव्याणि ग्राह्यानि इति तेनैव कथितम् । जीवनधारणार्थं यदि शूद्रादन्तरेण वृत्तिः नैव सम्भवेत् तर्हि धान्यादिकं द्रव्यं ग्राह्यम् । गौतमेन के भोज्यान्नाः प्रतिपादिताः । यथा - गोपालः, क्षेत्रकर्षकः, कुलमित्रम्, नापितः - दासः, एतेषां घृतक्षीरगुडपाकादिद्रव्यं - भोज्यमिति, न तु अन्नम् । ततः गौतमेन अभोज्यमपि निरूपितम् - यथा - केशैः कीटैश्च संस्पृष्टम्, अशुचिस्पर्शादिना अर्थात् रजस्वलादिभिः स्पर्शेण दूषितं, काकमुखस्पर्शने दूषितं, अथवा काकोपविष्टम्, द्रव्यं सर्वथा अभोज्यम्। भ्रूणहत्याकारिणा अवेक्षितं गवा उपघ्रातम्, भोक्त्र अभक्ष्यत्वेन शङ्कितं द्रव्यं सर्वथा अमोज्यं भवति । तथा च पर्युषितं, यत् कालवशात् अम्लं भवति तत् शुक्तश्चाभोज्यम् । परन्तु शुक्तेषु दधि भोज्यम् । पुनः पक्वम्, अर्थात् द्विपक्वं न भोज्यम् । परन्तु प्रथमजलसिद्धस्य पुनस्तैलपाकेन घृतपाकेन वा भर्जने कृते अपूपादीनां भक्षणं दोषाय न भवति । उत्सृष्टादीनामन्नमपि अभोज्यं भवति । यथा - उत्सृष्टः अर्थात् पितृभ्यां परित्यक्तः अपविद्धः, पुंश्चली - वेश्या, अभिशापग्रस्तः, कपटाचारी - दण्डिकः - वर्धकिः, लुब्धः - कारागाररक्षी - चिकित्सकः, व्याधः उच्छिष्टभोजनशीलः, शत्रुः - एतेषाम् - अन्नं सर्वथा अभोज्यम् । खल्वाटादीनां स्तेनादित्यक्तात्मपर्यन्तानां पातकीनाम् अन्नमपि अभोज्यम् । तथा च वृथान्नम् अर्थात् यदन्नं देवपित्रादिपरकं न भवति केवलं स्वभोजनपरकं तदपि अभोज्यम् एकपङ्क्त्युपविष्टेषु कस्यचिदपि गुरुभिन्नस्य उत्थानेन त्यक्तम् अन्येषां कृते अभोज्यम् भवति । अनर्चितं असम्मानपूर्वक विषमसमे च उपचारे तत्र न भोक्तव्यम्, अनिर्दशायाः - गोः क्षीरम् अजामहिष्योश्च क्षीरं दशरात्रमध्ये - अपेयम्, मेषक्षीरं सर्वथा सर्वदैव अपेयम् । स्रवत्पयस्तनी गौ, यमसूः अर्थात् या यमलमसूत, पुनर्गर्भधारणार्थं वृषमिच्छनी या - एताषां गवां विवत्सायाश्च - अजात - वत्सायाश्च अजामहिष्योश्चापि क्षीरं सर्वथा अपेयम् प्रतिपादं येषां पञ्च पञ्च नखाः सन्ति तेषां शल्यकादीनां मांसभक्षणं परिसंख्याविधिविचारदृष्ट्या भक्ष्यरूपेण प्रतिपादितं, तद्भिन्नं - अश्व - चमरी - सर्प - ग्रामचटक - प्लव - प्रभृतीनां भक्षणं निषेधितम् । ततः

काक – गृध्र – रक्तपादतुण्ड – जलचर ग्राम्यकुक्कुट – शूकर – धेनु बलीवर्द – प्रभृतयः अभक्ष्याः । गौतमेन भक्ष्याभक्ष्यनिरुपणप्रसंगे इदमपि स्पष्टीकृतं यत् –भक्ष्या अपि अवस्थाविशेषेण अभक्ष्याः भवन्ति । यदा पशोः दन्ताः पद्यन्ते तदा स मेध्यो भवति, अतः ततः प्राक्, वृथामांसं अर्थात् यत् देवपित्राद्यर्थं न भवति तत्, शिशुपशवश्च सर्वथा अभक्ष्यरूपेण छत्राकः लशुनं वृक्षत्वग् – निर्गतः धनीभूतः रसः, वृक्षच्छेदनोद्भवाः लोहितपत्राणि, वलाका – मान्धालः – रात्रिंचराः उलूकादयः विकृताः सर्पसदृशाः मत्स्याः मृगादिभिः हताः दोषयुक्ताः पशवश्च सर्वथा अभक्ष्याः, परन्तु तुण्डेन प्रतुद्य ये भक्षयन्ति ये च पादाभ्यां विकीर्य भक्षयन्ति मयूरादयः ये च जालपादाः न भवन्ति ते भक्ष्याः । एवमेव गौतमेन भोज्याभोज्यविचारः कृतः ।

| **बोधप्रश्नाः** |
|---|
| १. कुत्र ब्राह्मणो भुञ्जीत ? |
| |
| |
| २. पुनः पक्वम् अन्नं भोज्यमभोज्यं वा ? |
| |
| |
| ३. विवत्सायाः गौः क्षीरं पेयं मपेयं वा ? |
| |
| |
| ४. कीदृशाः मत्स्याः अभक्षयाः ? |
| |
| |

## श्राद्धम्

श्राद्धं नाम अदनीयस्य तत् स्थानीयस्य वा द्रव्यस्य प्रेतोद्देश्येन श्रद्धया त्यागः इति। अत्र आस्तिकबुद्ध्या मम परलोकप्राप्तपिता अस्मिन् निमन्त्रिते ब्राह्मणे विष्टरे वा आविष्टः सन् मद्दत्तं पिण्डं भुङ्क्ते इति धिया श्राद्धमनुतिष्ठति । तच्च श्राद्धम् अभावास्यामाम् अथवा कृष्णपक्षस्य पञ्चमीप्रभृतिषु तिथिषु कर्त्तव्यम् । अथवा सम्पूर्णे

कृष्णपक्षेऽपि श्राद्धं भवितुमर्हति इति तृतीयपक्षोऽपि गौतमेन कथितः । अत्र प्रदर्शितानां पक्षाणामुत्तरोत्तरं गरीयस्त्वम् इति मन्तव्यम् । माषतिलकादि द्रव्याणां, गयापुष्करादिदेशविशेषाणां, पङ्क्तिपावनादिगुणयुक्तानां ब्राह्मणानां सन्निधाने श्राद्धं करणीयमिति प्रोक्तम् । अतः एतेष्वन्यतमं यस्मिन् समये लभ्यते स एव श्राद्धस्य कालः इत्यपि गौतमेन प्रदर्शितम् ।

श्राद्धान्तविषयेऽपि कथितं यत् - श्राद्धे अदनीयस्य वस्तुनः गुणसंस्कारविधीन् अर्थात् पायसा दीन् मरिचजीरकादिभिः सुरभीकरणादीन् शक्तिमनतिक्रम्य कुर्यात् । श्राद्धे विषमान् ब्राह्मणान् निमन्त्र्ये पितुस्थाने त्रीन् पैतामहे त्रीन् प्रपितामह्ये त्रीन् भोजयेत्। अनेन नवसंख्यकान् ब्राह्मणान् भोजयेत् इति ज्ञायते । अथवा-युवानमपि सप्त पञ्चत्रीन् एकं वा भोजयेत् इति विकल्पविधानं विद्यते । पित्र्यादिषु एकमेकमिति त्रीन्, तन्त्रेण वा एकम् । पित्र्ये त्रीन् पितामहप्रपितामहयोरेकमेकमिति पञ्च । पितृपितामहयोः षट् प्रपितामहस्थाने चैक इति सप्त वा । उत्साहशब्दोत्र देशकालसामर्थ्यादिपरामर्शो । श्राद्धभोज्य ब्राह्मणनिरूपणप्रसङ्गेऽपि गौतमेन उपदिष्टं यत् विद्याचरित्रयुक्ताय ब्राह्मणाय भोजनदानं कर्त्तव्यम् । तत्राऽपि युवभ्योब्राह्मणेभ्यो प्रथमं प्रदातव्यम्। केचन धर्मशास्त्रकाराः पितृवत् - पितृपितामहपितामहा इव क्रमेण ये बृद्धबुद्धतर बृद्धतमास्तादृशेभ्यो ब्राह्मणेभ्यः दानं मन्यन्ते । बन्धुत्वस्थापनदृष्ट्या श्राद्धे ब्राह्मण-भोजनं न कर्त्तव्यम् । पिण्डदानविषयेऽपि कथितं यत् औरसदत्तादिपुत्राभावे सपिण्डाः भ्रातृपुत्रादयः तदभावे मातृसपिण्डाः मातामहान्वयाः तदभावे शिष्याः चकारात् सब्रह्मचारिणोऽपि दद्युः । तद्भावे अर्थात् शिष्याभावे ऋत्विगाचार्यौ दद्याताम् ।

श्राद्धे स्तेनादीन् न भोजयेदिति गौतमेन उपदिष्टम् । यथा-स्तेनः क्लिवः ब्रह्महत्यादि कर्त्ता नास्तिकः बहुयाजी छागपालः, मद्यपः कुत्सिताचरण-युक्तः मिथ्या साक्षी द्वारपालः उपपत्तिश्च। एतेषां श्राद्धेभोजनं निषिद्धम् । पुनश्च कुण्डाशिप्रभृतीन् श्राद्धे न भोजयेत् । कुण्डशब्दस्यार्थो भवति, पत्यौ जीवति सति परपुरुषात् जातः कुण्डः । भर्त्तरि मृते परपुरुषात् यः जायते सः गोलकः, तदन्नभोक्ताऽपि श्राद्धे भोजनं न कुर्यात् । सोमलतायाः विक्रेता, गृहदाहकः, विषदाता भग्नव्रत- ब्रह्मचारी, गणभृत्युः सगोत्रादिविवाहकृत्, हिंस्रः, कनीयसि भ्रातरि विवाहकृते अकृतविवाहः ज्येष्ठः परिवित्तिः, भ्राता परिवेत्ता, कृताऽग्न्याधानः कनिष्ठः पर्य्याधाता, तत्र पय्याहितः ज्येष्ठः, आत्महत्यार्थं उद्यतः, दुर्वालः, कुनखी(मृतनखः) कृष्णदन्तः, श्वेतकुष्ठी पौनर्भवः द्यूतकारः गायत्री-आदि-जपहीनः, राजभृत्यः शूद्रापत्तिः अनाश्रमी भूमिहर्त्ता कुसीदी वाणिज्यकृत् शिल्पोजीवी, धनुर्ज्जीवी, मृदङ्गादिवादनाभ्यासी, तालशीलः

नृत्यशीलश्च एते श्राद्धे अभोज्याः भवन्ति । तथा च ये पितुरनिच्छया स्वेछयाविभक्ताः, शिष्याः, सगोत्रोत्पन्नाश्च, श्राद्धे अभोज्याः भवन्ति । श्राद्धभोजी ब्राह्मणः श्राद्धान्नं भुङ्क्त्वा तद्दिने ब्रह्मचर्यं पालयेत् । गौतमेन श्राद्धविषयविचारप्रसङ्गे कुत्र श्राद्धं कर्त्तव्यम् इति शङ्कायाम् उक्तम् यत्-कुक्कुरादि दृष्टिपातवारणार्थं आच्छादिते स्थाने तिलादिप्रोक्षणं कृत्वा तत्र पितृभ्यो दद्यात् । तत्रापि पङ्क्तिपावनान् आहूय तेषामुपस्थितौ श्राद्धं सम्पादयेदिति ।

## पङ्क्तिपावनाः -

गौतमेन पङ्क्तिपावनब्राह्मणानां स्वरूपं कथितं यथा वेदविद्यायां निष्णातः शिक्षा-कल्प-व्याकरण-निरूक्तछन्दः-ज्योतिष-शास्त्रादि वेत्ता तथा ज्येष्ठसामिकः मूर्द्धानं दिव इत्यस्यामृचि उत्पन्नं सामं योऽधीतवान् । त्रीणामचिकेतं यजुर्वेदैकदेशस्तद्व्रतं च येनाचरितम् सः । ब्रताचरणशिलः त्रिमधुः, मधुवाता इति, ऋक्त्रयं, त्रिमधुइत्यादि ऋचामध्येता तदध्यायी वा। त्रिसुपर्णः ऋग्यजुषो अध्ययनकर्त्ता । पञ्चाग्निसाधकः अर्थात् यस्य आहवनीयगार्हपत्य-दक्षिणसभ्यावसथ्याग्नयः सन्ति । प्रसङ्गेऽस्मिन् हरदत्तेन कथितं यत् - सभ्यावसयाभ्यां सह पञ्चानामनुवाकानामध्येता पञ्चाग्निरिति । स्नातकः व्रताचरणशीलः । तथा च मन्त्रब्राह्मणवित् शब्दतोऽर्थतश्च मन्त्रब्राह्मणभागयोर्वेत्ता । धर्मज्ञः अर्थात् धर्मशास्त्रवित् । ब्रह्मदेयानुसन्तानः - ब्राह्मविवाहेन जात पुत्रश्च । एतेषु यः युक्तः सः पंक्तिपावनः इति कथ्यते । गौतमेन इदमपि कथितं यत् दुर्वालप्रभृतीन् श्राद्धे दैवादिकर्मसु च न भोजयेत् । कृतान्नश्राद्धे येषां भोजनम् उपदिष्टम्, येषां वा निषेधितं त एव अकृतान्न श्राद्धेऽपि वरणीया वर्जनीयाश्च भवन्ति । एवमेव गौतमेन श्राद्धस्वरूपं श्राद्धकाल-स्थान-द्रव्यादि-विषयाः पंक्ति-पावनाश्च प्रतिपादिताः ।

| **ब्रोधप्रश्नाः** |
| --- |
| १. किं नाम श्राद्धम् ? |
| |
| |
| २. कदा पितृभ्यो दद्यात् ? |
| |
| |
| ३. पिण्डदाने कः मुख्यः ? |
| |

| |
|---|
| ४. कः पंक्तिपावनः ? |
| |

**स्त्रीधर्माः** -

''पत्न्या सह यष्टव्यम्'' इति वाक्यानुसारं ज्ञायते यत् सह धर्मचारिणी स्त्री श्रौते स्मार्त्ते च कर्मणि न स्वतन्त्रा । तथा च स्त्री शब्दोपादानात् कन्यावस्थायां पिता, प्रौढावस्थायां भर्त्ता, वृद्धावस्थायां भर्त्तुरभावे पुत्रः सर्वथा रक्षेत् । अतएव मनुना कथितम् -

''बाल्ये पितुर्वशे तिष्ठेत् पाणिग्राहस्य यौवने ।
पुत्राणां भर्त्तरि प्रेते न भजेत् स्त्री स्वतन्त्रताम् ।।''

अनेन ज्ञायते यत् तस्याः सर्वासु अवस्थासु रक्षणं यथा स्यात् - तदर्थं धर्मशास्त्रकारैः एतत् विहितम् । तथा च कदाचिदपि स्त्री भर्त्तामतिरिच्य मनसापि परपुरुषं न कामयेत । सा च वाचि चक्षुषि कर्मसु च शृंखलिता स्यात् । कामपूर्वकं परपुरुषावलोकनं परद्रव्येषु दृष्टिनिक्षेपादिकं कार्यं च वर्जयेत् । यदि सा दैववशात् पतिहीना अपुत्रिका च तदा अपत्यलिप्सु भूत्वा देवरात् अपत्यमिच्छेत् । तत्रापि श्वशुरादिभिः आदिष्टा सति केवलं गर्भधारणसमये एव नियुक्तेन देवरेण साकं सम्पर्कं रक्षेत् । तत्रापि द्वितीयमपत्यं नेच्छेत् । देवराभावे गोत्रसम्बन्धात् - ऋषिसम्बन्धात् वा अपत्यम् इच्छेत् । अत्र देवरादीनां पारदौर्वल्यं - कल्पनीयम् । एतेषामभावे समानवर्गपुरुषात् अपत्यमिच्छेत् । अत्र जनयितुः अपत्यम् । परन्तु पूर्वं यदि निर्द्धारितं क्षेत्रिकस्य भवेदिति तर्हि क्षेत्रिकस्य भवेत् अन्यथा वीजिन एव, विधवानियोगप्रकारः गौतमेन प्रदर्श्य सधवानियोगप्रकारः प्रतिपादितः । पत्यौ जीवति सति यदि अपुत्रिका पुत्रमिच्छेत् तर्हि उत्पादयितुः अपत्यं न भवति । अपि तु क्षेत्रिकस्यैव भवति । यदि अनियोगादुत्पन्नः तर्हि वीजिन एव । भरणात् पोषणात् च वीजिक्षेत्रिकयोरुभयो र्वा अपत्यं भवति, यदि तथा समयः क्रियते चेत् । नियोगविधावपि भर्त्तरि देशान्तरवर्त्तिनि सति षड्वार्षिकं यावत् स्त्री अपेक्षां कुर्यात् । विद्यासम्बन्धे अध्ययनार्थं विदेशगमने ब्राह्मणस्य भार्या द्वादशवर्षाणि प्रतीक्षां कुर्यात् । यतः एकस्य वेदस्याध्ययनार्थं द्वादशवर्षाणि अपेक्ष्यन्ते । अग्रजे प्रोषिते अर्थात् विद्यार्थं विदेशे गते अनुजाश्च द्वादशवर्षाणि विवाहार्थं प्रतीक्षेत । पित्रादिः यदि कन्यायाः विवाहं न कुर्युः, तर्हि कुमारी त्रीन् ऋतून् अतीत्य अनिन्दितेन सजातीयेन समुचितकुलगोत्रादियुक्तेन वरेण सह

विवाहं कुर्यात् । कन्याया दानमकुर्वन् पित्रादि दोषीति केचन आचार्या मन्यन्ते । वस्त्रपरिधानात् प्राक् कन्यादानं कर्त्तव्यमिति । विवाहार्थं धनाभावे सति शूद्रात् अपि द्रव्यग्रहणं कृत्वा विवाहं कुर्यात् । क्षुधार्त्तः दिनत्रयं यावत् उपवाशेन स्थित्वा भोजनमात्रं धनं शूद्रादिभ्यः अपि गृह्णीयात् । अत एव आपत्तौ जीवनधारणार्थं गौतमेन एतत् कथितम् । यतः कथितमस्ति यत् – सर्वत एवात्मनं गोपायीत ।। इति । तत्र किमर्थं धनं स्वेच्छया नीतमिति यदि राजा पृच्छेत्, तर्हि स एव क्षुधार्त्तः सत्यं वदेत् । तत्र एवंभूतस्य क्षुधार्त्तस्य विद्याचरित्रादिकं विचार्य यथोचिते कर्मणि नियुक्तिः राज्ञा कर्त्तव्या । नोचेत् धर्मतन्त्रपीडायां राज्ञः दोषः स्यात् । एवमेव गौतमेन एतेविषयाः खण्डेऽस्मिन् प्रतिपादिताः ।

| **बोधप्रश्नाः** |
| --- |
| १. श्रौतस्मार्त्तकर्मसु स्त्री स्वतन्त्रा अस्वतन्त्रा वा ? |
| |
| |
| २. पतिहीना अपत्यरहितायां सत्याम् अपत्यं कस्मात् इच्छेत् ? |
| |
| |
| ३. विद्याऽध्ययनार्थं पत्यौ विदेशगमने भार्या कति वर्षाणि प्रतीक्षते ? |
| |
| |
| ४. धर्मतन्त्रपीडायां कस्य दोषः गौतमेन स्मृतः ? |
| |
| |

## सारांशः

प्रियपाठकाः ! जनने मरणे स्रावादिषु च चित्तचापल्पवशात् मनुष्यस्य अन्तःकरणे स्थिरता न तिष्ठति, तत्र तदधिकारसंकोचहेतुभूतमशौचं धर्मशास्त्रकारैः कल्पयन्ति । अतः मरणे-जनने स्रावे च अशौचव्यवस्था अत्र सम्यक् विहिता । गौतमेन वर्णानामाश्रमाणां कृते धर्मान् प्रतिपाद्य तदधिकारहेतुभूतमशौचं तद्भेदान् च यथा निरूपितवान् तथा खण्डेऽस्मिन् प्रतिपादितमस्ति । मनुष्यः जातमात्रेण त्रिभिः ऋणैः

ऋणवान् भवति । यथा - ऋषिऋणम्, देवऋणं, पितृऋणश्चेति अर्थात् - ऋषिऋणं नाम वेदादिशास्त्राणामध्ययनम्, देवऋणं नाम - देवतोद्देश्येन यागादिपितृऋणं नाम - परलोकगतानां पितृपुरुषाणामुद्देश्येन श्राद्धादिसम्पादनम् । ऋणत्रयाणामपाकरणं विना मनुष्यः स्वकीयं पारमार्थिकं लक्ष्यं साधयितुं समर्थो न भवति । अतः धर्मशास्त्रकारै ऋणत्रयाणामपाकरणं सर्वथा मनुष्येण कर्त्तव्यमिति प्रोक्तम् । एतेषु पितृऋणं श्राद्धमिति कथ्यते । परलोकगतानां पितृपुरुषाणामुद्देश्येन श्रद्धया पिण्डादिप्रदानपूर्वकं पितुऋणात् मुच्यते मनुष्यः । अतः गौतमेन श्राद्धविषये सम्यक् विचारः कृतः । अत्र श्राद्धस्वरूपं-स्थान-काल-पात्राणाञ्च विवेचनपूर्वकं श्राद्धे भोज्याः अभोज्याश्च निरूपिताः । अन्ते पंक्तिपावनब्राह्मणस्य परिचयोऽपि प्रदर्शितः श्राद्धकर्मसम्पादनार्थम् । अस्मिन् खण्डे स्वकर्मसु ये प्रशस्ताः द्विजातयः तेषां गृहेषु ब्राह्मणः भुञ्जीत । अत्र भुञ्जीत इति न विधिः । अपि तु परिसंख्या ये च स्वकर्मसु प्रशस्ताः तेभ्यः प्रतिग्रहमपि कुर्यात् । गौतमेन काष्ठादिद्रव्याणि सर्वेभ्यः ब्राह्मणः ग्रहीतुं शक्नोति इति कथितम् । एवमेव भोज्याभोज्यविचारः खण्डेऽस्मिन् जातः । धर्मसूत्रकारेण गौतमेन स्त्रीणां कृते केचन नियमाः विधिनिषेधमुखेन प्रतिपादिताः श्रौतस्मार्त्तकर्मसु स्त्री पत्या सह धार्मिककर्मसु प्रवृत्ता भवेत् । स्त्री कदाचिदपि व्यभिचारीणी न भवेत् । वाक्चक्षुःकर्मसंयता स्यात् । प्रसङ्गेऽस्मिन् विंधवासधवाविषये नियोगविधिः गौतमेन कथितः । भर्त्तुः विदेशादिगमने भायायाः कर्त्तव्यमुपदिष्टम् । मुख्यवृत्त्या जीवनधारणे असमर्थः किं कुर्यादिति गौतमेन प्रतिपादितः धर्मतन्त्रपीडायां राज्ञः दोषः भवतीतितेनैव कथितम् एवमेक एते विषयाः खण्डेऽस्मिन् विवेचिताः ।

**पारिभाषिकशब्दाः** -

| | | |
|---|---|---|
| ब्रह्म | - | वेदः |
| प्राड्विवाकः | - | पृच्छतीतिप्रात् |
| अशौचम् | - | ब्राह्मणः, राजा वा |
| अत्ययः | - | विनाशः दुःखं च |
| सपिण्डः | - | आत्मानमारभ्य |
| उपरितनसप्तमादधस्तनसप्तम- | | पर्यन्त अन्वयः |
| श्रोत्रियः | - | अधीतैकशाखः |
| उपसम्पन्नः | - | एकगृहवासी, समीपतरवासी वा |
| चैलम् | - | वस्त्रम् |
| अपरपक्षः | - | कृष्णपक्षः |

| | | |
|---|---|---|
| कुण्डः | - | पत्यौ जीवति सति परपुरुषात् जातः |
| गोलकः | - | मृते भर्त्तरि परपुरुषात् जातः |
| किलासी | - | कुष्ठी, भूमिहर्त्ता वा |
| दुर्बालः | - | निर्लज्जः |
| कितवः | - | द्यूतकरः |
| वाणः | - | वीणाविशेषः, आग्नेयः शब्दो वा |
| शुक्तम् | - | अम्लम् |
| निर्घातः | - | अन्तरिक्षगतो ध्वनिः |
| स्तनयित्नुः | - | मेघशब्दो |
| प्रतिविधम् | - | प्रतिधर्मशास्त्रम् |
| वृत्तिः | - | जीवनोपायः |
| कदर्यो | - | लुब्धः |
| वन्धनिकः | - | कारागाररक्षी |
| कलविङ्कः | - | ग्रामचटकः |
| क्याकुः | - | छत्राकः |
| मद्गुः | - | जलवायसः |

## आदर्शप्रश्नाः -

**निबन्धात्मकप्रश्नाः** - (प्रत्येकं २०/१५ अङ्काः)

१. साक्षिलक्षणं विलिख्य साक्षिधर्मान् प्रतिपादयत ।

२. अशौचभेदान् विलिख्य वर्णभेदेन शावाशौचं निरूपयत ।

३. श्राद्धकालान् प्रदर्श्य श्राद्धे अभोज्यान् निर्दिशत ।

४. गौतमोक्तदिशा अनध्यायान् प्रतिपादयत ।

५. स्त्रीधर्मान् यथाग्रन्थं विमृशत ।

६. ब्राह्मणस्य भोजनविधिं विलिख्य प्रतिग्रहे नियमान् निरूपयत ।

**विश्लेषणात्मकप्रश्नाः** - (प्रत्येकं १२/१० अङ्काः)

१. साक्षिभेदान् प्रदर्श्य कथं साक्षी याप्यो दण्डश्च भवतीति प्रतिपादयत ।

२. वर्णानां जननाशौचं विमृशत ।

३. श्राद्धभोज्यान् निरूपयत ।

४. यथाशास्त्रं पङ्क्तिपावनान् प्रदर्शयत ।

५. अध्ययनकालान् विवेचयत ।

६. अभोज्यानि यथाशास्त्रं प्रदर्शयत ।

७. स्त्रीणामस्वातन्त्र्यं यथाग्रन्थं प्रतिपादयत ।

८. स्वाधीतग्रन्थदिशा प्रतिग्रहापवादान् प्रकाशयत ।

**लघुप्रश्नाः** - (प्रत्येकं ५ अङ्काः)

टिप्पणी प्रदेया -

१. स्रावाशौचम्, २. साक्षी, ३. सद्यःशौचम्, ४. अशौचे ज्ञातीनां कृत्यम्, ५. श्राद्धम्, ६. पङ्क्तिपावनाः, ७. अशौचभेदाः, आकालिकानध्यायः, अष्टकाः, अभक्ष्यजीवाः, भोज्यान्नाः, अभोज्यान्नाः, अपेयानि, नियोगविधिः ।

**एकाङ्कप्रश्नाः** - (प्रत्येकं १ अङ्कः)

१. कः साक्षीति कथ्यते ?

२. साक्षि कतिविधिः ?

३. मिथ्याभाषणेन साक्षी किंभवति ?

४. ब्राह्मणस्य शावमाशौचं कति रात्रात्मकम् ?

५. पिण्डनिवृत्तिः कदा भवति ?

६. अपरपक्षो नाम किम् ?

७. श्राद्धदाने कः प्रथमाधिकारी ?

८. पत्यौ जीवति सति परपुरुषात् यः जायते ?

९. क्षत्रियस्य शावमाशौचं कति रात्रात्मकम् ?

१०. युद्धे रतानां कृते किमात्मकमाशौचम् ?

११. का पक्षिणीति कथ्यते ?

१२. का नाम प्रौष्ठपदी ?

१३. ''स्तयियित्नुः'' इत्यस्य कोऽर्थः ?

१४. कः प्रदोषः ?

१५. एधः इत्यस्य कोऽर्थः ?

१६. धाना इत्यस्य कोऽर्थः ?

१७. किं नाम भावदुष्टम् ?

१८. किं नाम पर्युषितम् ?

१९. स्त्री कं नातिचरेत् ?

२०. के विद्यागुरवः ?

२१. के योनिसम्बन्धाः ?

२२. कन्याया दानमकुर्वन् कः दोषी ?

**एकाङ्कप्रश्नानामुत्तराणि** – १. साक्षात् दर्शनात् श्रवणात् च, २. एकादशविधः, ३. नरकपातः,दण्डश्चश्च, ४. दशरात्रात्मकम्, ५. सप्तमे, ६. कृष्णपक्षः, ७. औरसपुत्रः (ज्येष्ठः), ८. कुण्डः, ९. एकादशरात्रात्मकम्, १०. सद्यः शौचम्, ११. दिनद्वयमध्यवर्त्तिनी रात्रि, १२. भाद्रपूर्णिमा, १३. मेधध्वनिः, १४. सूर्यास्तात् परं त्रिमुहूर्त्तम्, १५. काष्ठम्, १६. भृष्टयवाः, १७. भोक्ता अभक्ष्यत्वेन शंक्तितम्, १८. रात्र्यन्तरितम्, १९. भर्त्तारम्, २०. आचार्यादयः, २१. जामातृभागिनेयमातुलादयः, २२. पित्रादिः ।

❖❖❖

## (UNIT - IV)
## तृतीयप्रश्नस्य प्रथमाध्यायात् चतुर्थाध्यायं यावत्

### प्रस्तावना

धर्मशास्त्रे स्मार्त्तधर्मः षड्विधः इति प्रतिपादितम् । षड्सु स्मार्त्तधर्मेसु अन्यतमः निमित्तधर्मः । अत्र निमित्तं नाम पापं तदपनुत्तये यत् विहितं तत् नैमित्तिकमिति कथ्यते । अत एव नैमित्तिकं नाम प्रायश्चितम् । अस्मिन् खण्डे नैमित्तिकधर्माः प्रतिपादिताः भवन्ति । गौतमेन वर्णधर्मः आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः विषये सम्यक् विवेचनं कृत्वा सम्प्रति मनुष्याणां पापक्षयाय प्रायश्चित्तं विधीयते । सर्वप्रथमतया गौतमेन कथितं यत् प्रायश्चित्तैः पापक्षयो भवति न वा तदपि विवेचनीयम्, अतः तेनैव प्रमाण पुरःसरं प्रायश्चित्तमीमांसा कृता ।

ततः पापानां गुरुलघुकल्पनादृष्ट्या प्रायश्चित्तोपदेशोऽपि कृतः । ततः अकृतप्रायश्चित्तानां संसर्गोऽपि निषेधितः । पातकिसंसर्गं वारयितुं तेन कथितं यत् पातकसंयुक्तं पितरमपि त्यजेत् । का कथा अन्येषां विषये इति । तत्र त्यागेऽपि कश्चनविधिः विद्यते, तस्मिन् विषये महान् विचारोऽपि कृतः । एवमेव खण्डेऽस्मिन् एते विषयाः विवेचिताः भवन्ति ।

धर्मशास्त्रे प्रमुखरूपेण विवेचितेषु । विषयेषु प्रायश्चित्तस्य महत्वं विद्यते । यतः प्रायश्चित्तैः मनुष्यः समाजे व्यवहारयोग्यतां प्राप्नोति; अन्यथा न केवलं निन्दितो भवति,अपि तु त्याजो दण्डयोऽपि भवति। तथा च स पापविमुक्तो भूत्वा स्वकीयं लक्ष्यमपि साधयितुं समर्थो भवति । गौतमः पतितत्यागविधिं प्रतिपाद्य के पुनः पतिता इति प्रदर्शितवान् । अस्मिन् खण्डे के पतिताः, किं नाम पतनम्, पापानां प्रायश्चित्तं तत्रापि ज्ञानाज्ञानकृतपापानां क्षयो केन भवति इत्यादीनां विषयाणां विवेचनं च जातम् । पतनीये कर्मणि ये संयोजयन्ति ते पातकसंयोजकाः भवन्ति । तत्रापि प्रयोजकानुमन्तृनिमित्तभेदेन संयोजोकाः भिद्यन्ते । तेषां विवरणम् अपि अत्र प्रदीयते । हिंसादिपातकानां कृते प्रायश्चित्तानि प्रसंगेऽस्मिन् विचारणीयानि भवन्ति ।

## उद्देश्यकथनम् -

- निमित्तधर्मविषयं विचारयिष्यन्ति ।
- प्रायश्चित्तमीमासां च आलोचयिष्यन्ति ।
- पापोपशमने कारणानि प्रापशोधकानि वा ज्ञातुं प्रभवन्ति ।
- पातकिसंसर्गनिवारणोपायान् निर्णेतुं शक्नुवन्ति ।
- के पतिताः, पातकसंयोजकाः किं नाम पतनश्च निर्णेतुं शक्नुवन्ति ।
- पतनकारणानि आलोचयिषयन्ति ।
- प्रायश्चित्तलक्षणं ज्ञानज्ञानकृतमहापातकानां प्रायश्चित्तानि आलोचयिष्यन्ति ।

## निमित्तधर्मः -

षट्षु स्मार्त्तधर्मेषु अन्यतमः धर्मः निमित्तधर्मः इति कथ्यते, अत्र निमित्तं नाम पापम् । तस्य पापस्य क्षयाय यत् विहितं तत् नैमित्तिकं मिति कथ्यते । अत एव नैमित्तिकधर्मः प्रायश्चितं इति कथ्यते । तत्रादौ निमित्तस्य अर्थात् पापस्य उत्पत्तये किं कारणं इति जिज्ञासायां गौतमेन अयाज्ययाजनादिनि कारणानि प्रदर्शितानि । संसारेऽस्मिन् मनुष्यः पुण्येन कर्मणा पुण्यं पापेन कर्मणा पापं प्राप्नोति इति ज्ञायते । यत् कर्म मनुष्यं पातयति तदेव पातकं इति कथ्यते । अतः पातकं नाम दुष्कर्म जन्य अपूर्वविशेषः । कर्म खलु आशु विनाशी, प्रतिक्षणं क्षीयमाणं कर्म फलापूर्वं सृजति । तत्फलं भोगं विना न नश्यति इति उक्तम्, कानिचन कर्माणि सन्ति येषां फलं कालान्तरे प्राप्यते । विद्वद्भिः अदृष्टरूपस्य फलस्य उत्पत्तये अपूर्वः कल्पितः । अतः स्वआचरितात्पुण्य कर्मणः जायमानं अपूर्वं पुण्यापूर्वाभिधेयं स्वर्गरूपं फलम् ददाति । तथैव हृत्वा,

सुरापानस्तेयादिदुष्कर्माकृत्वा पापापूर्वं नरकपलम् च भवति। एवंभूतस्य पापस्य अनेकाः संज्ञाः अमरसिंहेन प्रदर्शिताः यथा –

अस्त्रीपापं पुमान् पांप्मा पापं किल्विषकल्मषम् ।
कलुषं वृजिनैनोऽधर्म दुरितदुष्कृतम् ।।

धर्मसूत्रकारेण गौतमेन प्रसङ्गेऽस्मिन् कथितं यत् याप्येन कर्मणा मनुष्यः लिप्तो भवति । अत्र याप्यं नाम सामान्येन निन्द्यमिति ज्ञायते, किं नाम निन्द्यं कर्म इति चेत्, उच्यते अयाज्ययाजनम–भक्ष्यभक्षणमवद्यवदनं शिष्टस्याक्रिया प्रतिषिद्धसेवनमिति । अर्थात् अयाज्यानां नाम पतितादीनां याजनम् । अभक्ष्याणां नाम लशुनादीनां भक्षणम्, अवद्यानाम् नाम अनृताश्लीलादीनां वदनं भाषणम् वा। शिष्टस्य शास्त्रविहितस्य अक्रिया अकरणम् । प्रतिषिद्धस्य मद्यपानादेः सेवनमिति। अत्र पापिनां सङ्गः पापहेतुरिति बोधयितुम् ''अयाज्ययाजनमिति प्रथमं निर्दिशति पापिसङ्गवारणाय ।'' ततः अभक्ष्यभक्षणेन भोक्तुः शरीरमात्मा च कलुषीभवतीति तत् पार्थक्येन प्रदर्शितम् । अतः अवद्यवदनेन आक्षिप्तस्य ऐहिकं दुःखमुत्पद्यते, मानसिकम् वक्तुश्च पारत्रिकं नरकादिरूपं दुःखं, वाचिकः पक्षिमृगतामिति मानसिक सन्तापभोगहेतुभूतं जन्म च जायते इति। अतः एतानि याप्य कर्माणि इति कथ्यन्ते । याप्ये कर्मणि पापक्षयार्थं प्रायश्चितविधानं धर्मशास्त्रकारैः प्रतिपादितं। परन्तु गौतमेन प्रसङ्गेऽस्मिन् कथितं यत् प्रायश्चित्तैः पापक्षयो भवति नवेति मीमांसा कर्त्तव्या यतः ब्रह्मवादिनः सपक्ष–विपक्षप्रमाणप्रदर्शनपुरसरम् विचारयन्ति यत् अनुष्ठिते याप्ये कर्मणे प्रायश्चितं कुर्यात् न कुर्यादिति । अत एव विषयेऽस्मिन् विवेचनं अग्रे भविष्यति ।

| **बोधप्रश्नाः** |
|---|
| १. याप्यमित्यस्य कोऽर्थः ? |
| |
| |
| २. के आयाज्याः ? |
| |
| |
| ३. कानि याप्य कर्माणि ? |
| |
| |

**प्रायश्चित्तमीमांसा –**

वेदविहितकर्मणः अकरणात् वेदनिषिद्धस्य कर्मणः चानुष्ठानादिन्द्रयार्थेषु प्रसक्तत्वात् च नरः यत् पापं करोति तदर्थं पूर्वाचार्यैः प्रायश्चित्तं प्रकल्पितम् । अतः आपाततः प्रायश्चित्तानि पापनाशकारणानीति वक्तुं शक्यते । परन्तु प्रायश्चित्तेन पापक्षयो भवति न वेति केषांचिन्महतां मनसि महती विचिकित्सा समजनि । यथा नहि कृतकर्मभोगमन्तरेण नाशयितुं शक्यते । यतः ''जगत्यस्मिन् सुखदुःखावाप्तिः कर्मजा'' इति विधिविहितर्मणः आचरणेन पुण्यात्मकमपूर्वं जायते । निषिद्धस्य कर्मणः आचरणेन पापात्मकमपूर्वं जायते अत एव कर्म सुखात्मकं दुःखात्मकं वा भवतु । परन्तु आचरितेऽपि प्रायश्चित्ते हि पापानि क्षीयन्ते इति कैश्चित् सिद्धन्तितम् । यथा प्रायश्चित्तैरपैत्यैनः इति । अतः पापक्षयार्थं विशुद्ध्यर्थं च प्रायश्चित्तं कुर्यादिति । अपरैः न हि पापानि क्षीयन्ते इति क्षयः निषिद्ध्यते । यथा ब्रह्मवादिनां मतं गौतमेन उद्धृत्य उक्तं यथा – ''न हि कर्म क्षीयत'', इति वचनात् पापात्मकं पुण्यात्मकं वा कर्म न क्षीयते, अतः कर्म भोगमन्तरेण न क्षीयते इति स्थितिः । अत एव पापापनुत्तये प्रायश्चित्तमनाचरणीयमिति पूर्वपक्षः । यथा पृथिव्यां वृक्षादीनां प्राणबीजानि सौवर्णरत्नादिनिधयः विराजन्ते तथा स्वकर्मफलं भुक्तिं यावत् तिष्ठति । अत एव मनुष्यः यथाकालम् आत्मकृत्कर्मणः फलं भुङ्क्ते । ''कुर्यादित्यपरम्'' इति वचनानुसारं सिद्धान्तपक्षे प्रायश्चित्तं कुर्यादिति मीमांसितम् ।

तत्र शंकायाः दुरीकरणार्थं श्रुतिः आश्रयणीया । यतः धर्मस्य मूलप्रमाणं वेद एव। स्मृतिवेदमनुसरति । अतः अस्यां विवदमानावस्थायां श्रुतिरेव आश्रयणीया । पापक्षयमतानुयायिनः श्रुतिवचनमुत्थाप्य इत्थं समाधानमाश्रयन्ति । यथा – ''पुनस्तोमेनेष्ट्वा पुनः सवनमायान्तीति ।'' अत्रायमाशयः विपदि असत्प्रतिग्रहे दोषयुक्तः द्विजः पुनस्तोमानाम्ना एकाहयागं कृत्वा पुनः सवनाधिकारमधिगच्छति । पुनश्च शास्त्रविहितकालेष्वनुपनीतद्विजातिपुत्रः व्रात्यसंज्ञको भवति । स व्रात्यरोधकरूपप्रायश्चित्तयागं कृत्वा पुनः कर्मसु अधिकारी भवति । पुनश्च ''तरति सर्वं पाप्मानं तरति ब्रह्महत्यां योऽश्वमेधेन यजेत इति वचनात्'' अयाज्ययाजनादि सर्वेभ्यः पापेभ्यः मुच्यते अश्वमेधकर्त्ता । तथा च सकलपाप-मूर्द्धन्यभूतब्रह्महत्यारुपमहापातकमपि अश्वमेधयागकरणेन नश्यतीति विज्ञायते । एतेन श्रुत्यंशत्रयेण प्रमाण-भूतेन प्रायश्चित्तस्य पापशोधकत्वं प्रमाणीक्रियते । अत एव नकुर्यात् इति पक्षः विरोधिना बलवता प्रमाणेन बाध्यते इति प्रायश्चित्तं कर्त्तव्यमेव । शंखादिवचनं च अकृतप्रायश्चित्ता-दिविषयमेव ।

| **बोधप्रश्नाः** |
| --- |
| १. किं नाम नैमित्तिकम् ? |
| |
| |
| २. पापोत्पत्तये कानि कारणानि ? |
| |
| |
| ३. प्रायश्चित्तैः पापक्षयो भवति न वा ? |
| |
| |

## पापशोधकानिः -

गौतमेन पापशोधकानि जपतपादीनि पञ्च कारणानि प्रतिपादितानि । यथा - जपादिभिः अर्थात् उपनिषदां पाठादिभिः, पयोव्रतादीनि-ब्रह्मचर्यं सत्यभाषणादीनि तपांसि, हिरण्यादि- द्रव्याणां दानकर्मभिः पापक्षयो भवति इति । तया च उपनिषेदीनि एकविंशति-पावमानानि अर्थात् पापक्षयसाधनानि प्रतिपादितानि । यथा - उपनिषदः रहस्यब्राह्मणानि, आध्यात्मिकानि, वेदान्ताः श्रुतिशिरोभागाः, यजुर्वेदस्य अन्तभागरूपेण ईशावास्यमित्यादेः । सर्वच्छन्दसु सर्ववेदेषु संहितापाठः । मधूनि मधूवाता इत्यादीनि मधुशब्दयुक्तानि यजूषि । अधमर्षणं ऋतं च सत्यत्यादि सूक्तम् । अधमर्षणेन दृष्टत्वात् तस्य अधमर्षणसंज्ञा अथर्वशीरः ब्रह्मा देवानां प्रथम इत्यादि । ‘‘नमस्ते इत्याद्याः रूद्राध्यायमन्त्राः ।’’ पुरुषसूक्तं ‘‘सहस्ररीर्षेत्यादि मन्त्राः । कुष्माण्डानि यद्देवा देवहेडनम् इत्यादयस्त्रयो मन्त्राः’’, कूष्माण्डाः कूष्माण्ड्यः कूष्माण्डानि इति लिङ्गत्रये ग्रन्थभेदेन एषां निर्देशोऽपि । पावमान मन्त्राः ‘‘पावमान्यः पवमानः सोमः यासां देवताः स्वादिष्टया मदिष्टया इत्याद्य ऋचः आमण्डलसमाप्तेः ।’’ विष्णु धर्मेतु स्वादिष्ठयेतिसूक्तानां सप्तषष्टिरिहोदिता । दशोत्तरा ऋचश्चैता पावमान्यः शतानि षट् इति, ऋक्संहितायां तु मन्त्रसंख्या । तत्सवितुरिति सावित्री प्रसिद्धा । एतानि पावमानानि भवन्ति । साकल्येन वा एकैकशो वा जाप्यानि इति गौतमेन उपदिष्टानि । गौतमेन जप्यनिर्देशानन्तरं तपांसि प्रतिपादितानि । यथा - पयोव्रतता नाम भोजनान्तरपरिहारेण क्षीराहारेण वर्त्तनम् । शाकभक्षता, आम्रादिफलभक्षता, प्रसृतिपरिमितं यावकभक्षणं, घृतेन निघृष्य हिरण्यप्राशनम्, अत्र घृतमिति गव्यम् ।

सोमपानं सोमयागेषु एव । तथा च पञ्चगव्यं शंखपुष्पादीन्यपि तपोजपादिकाले भोज्यानि इति गौतमनोपदिष्टम् । जपतपादिकर्मसम्पादनार्थं पवित्रदेशाः अपि गौतमेन कथिताः । यथा - पर्वताः, स्रवन्त्यः नद्यः, पुष्करादिपुण्यह्रदाः, प्रयागादीनि तीर्थानि, ऋषिणां निवासस्थानानि, गोष्ठं, परिष्कन्धः - नाम देवालयः इत्यादिषु स्थानेषु जपतपसम्पादनेन फलाधिक्यं भवति इति गौतमेन प्रतिपादितम् । तथा च ब्रह्मचर्यपालनम्, सत्यप्रकाशनम् त्रिषु सवनेषु अर्थात् प्रातर्मध्याह्नसायंसन्ध्यासु स्नानम्, आद्रवस्त्रपरिधानम्, भूमावेव शयनम्, अनशनम्, इत्यादीनि शरीरक्लेशकराणि तपांसि अनुष्ठेयानि भवन्ति । दानेनापि पापक्षयो भवतीति प्रतिपाद्य कानि दानयोग्यानीति गौतमेन कथितानि, यथा - हिरण्यं, गौभूमिः, तिलाः, घृतम्, अन्नम् च देयद्रव्याणि । जपस्तपादिषु अपेक्षिताः कालाः तेनैव प्रदर्शिताः । यथा - संवत्सरः, षड्मासाः, चत्वारः मासाः, त्रयो मासाः, द्वौ मासौ, एकःमासः चतुर्विंशत्यहो, द्वादशाहो, षड्हः, त्र्यहः, अहोरात्रम्-इति कालाः निर्धारिताः । एतानि जपादीनि पापक्षयकराणि यदि केषुचित् पापेषु नैव अनुक्तानि तर्हि ''एनः सु गुरुषु गुरूणि लघुषु लघूनि'' इति कल्पनीयानि भवन्ति । अर्थात् - अत्र गुरुपदेन गुरुषु गुरुतरेषु गुरुतमेषु च एनः सु गरूणि प्रायश्चित्तानि, लघुतरेषु लघुतमेषु च एनः सु लघूनि लघुतराणि लघुतमानि च पूर्वप्रदर्शितानि पापक्षयकरणानि प्रायश्चित्तानि कल्पनीयानि इति । तथा च - गौतमेन इदमपि उपदिष्टं यत् - कृच्छ्रः अतिकृच्छ्रश्च चान्द्रायणश्चेति आदिष्टेषु अनादिष्टेषु च पापेषु पापोपशमकारकम् नाम पापनाशकं भवतीति ।

## पातकिसंसर्गनिवारणोपायाः -

अस्मिन् खण्डे गौतमोक्तदिशा पातकिसंसर्गनिवारणोपायः विचार्यन्ते । वस्तुतः पापकर्म-निराकरणाय पापिसंसर्गवारणे मुख्योपायः इति ज्ञायते । पापिमात्रस्य परित्यागः सर्वथा करणीयः इति गौतमस्याशयः । यतः तेनैव कथितं यत् - पतितं पितरमपि त्यजेत् का कथा अन्येषां विषये । तथा च राजघातकेन शूद्रयाजकेन, वेदनिन्दकेन, भ्रूणहत्याकारिणा, चण्डालादिभिंश्च सह यः सम्पर्कं स्थापयति, तेन सह संसर्गं न स्थापयेत् । पापं कृत्वा यदि प्रायश्चित्तं नाचरति, तर्हि तत्र आचार्यं योनिसम्बन्धान् अर्थात् - जामातृभागिनेयमातुलादीन् सपिण्डान् समानोदकान् च आहूय ग्रामाद्वहिः तेषां सम्मुखे अकृतप्रायश्चित्तस्य नाम्ना दासीघटात् पतितस्य नामग्रहणपूर्वकं जलमानीय सर्वे दक्षिणस्कन्धघृतयज्ञोपवीताः मुक्तशिखाः घटं विपर्यस्येयुः । तदर्थं प्रेतकर्माणि तत्रैव समाप्य सचैलस्नानं कृत्वा प्रेतक्रियान्यायेन ग्रामं

प्रविशेयुः । तदनन्तरं न कोऽपि तेन अकृतप्रायश्चित्तेन पतितेन सह सम्भाषणं कुर्यात् । यदि कश्चन अज्ञानपूर्वकं वार्त्तालापं करोति चेत् तर्हि एकरात्रं ज्ञानपूर्वकं त्रिरात्रं दण्डायमानः तिष्ठेत् । यदि अकृतप्रायश्चित्तः प्रायश्चित्तमाचरेत् तर्हि स्वर्णपात्रेण पवित्रजलमानीय तस्मै दद्युः ज्ञानिप्रभृतयः । तत्र शान्ताद्यौः शान्ता पृथिवी शान्तम् इत्यादिभिः पावमानीभिः ''तरत्समन्दी धावति'' इत्यादिभिः ऋग्भिः, यद्देवा देवहेडनमित्यादिभिः च आज्यं जुहुयात् । होमान्ते दक्षिणात्वेन ब्राह्मणाय हिरण्यं अथवा गौ दद्यात् । परन्तु यत्र यस्य कृते मरणान्तिकं प्रायश्चित्तं शुद्धिकारकं भवेत् । तत्र मृतः शुद्धयेत् । इति गौतमेन स्पष्टीकृतम् । मरणान्तिकप्रायश्चित्तानुष्ठानानन्तरम् अथवा प्रायश्चित्ते प्रवृत्तस्यापि अन्तरा मरणे प्रेतकर्माणि कुर्युः इति । एवमन्यत्रापि उपपातकादिषु विचार्यम् ।

| **बोधप्रश्नाः** |
|---|
| १. केन सह संपर्कः गौतमेन निषेधितः ? |
| |
| |
| २. अकृतप्रायश्चित्तेन सह संपर्कः स्थापनीयः न वा ? |
| |
| |
| ३. प्रायश्चित्ते प्रवृत्तस्य अन्तरा मरणे प्रेतकर्माणि भवेत् न वा ? |
| |

## पतिताः -

गौतमेन पतितानां त्यागविधिः प्रतिपादितः । तत्रादौ के पुन पतिता इति जिज्ञासायां उक्तं यत् - ब्रह्महा - अर्थात् - यः ब्राह्मणं हतवान्, सुरापः - सुरापानकर्त्ता, गुरुतल्पगः - गुरोः तल्पं गच्छतीति गुरुतल्पगः । अत्र - तल्पशब्दस्यार्थो भवति शय्या, लक्षणया भार्य्या इति अर्थः ज्ञायते अत एव गुरोः भार्या गच्छतीति गुरुतल्पगः । मातृपितृसम्बन्धागः, स्तेनः ब्राह्मणस्य सुवर्णपरिमितं सुवर्णं यः

अपहरति, (ब्राह्मणसुवर्णाहर्त्ता) नास्तिकः - नास्तिपरलोक इति यः चिन्तयति सः । निन्दितकर्माभ्यासी - अर्थात् - निन्दितस्य प्रतिषिद्धस्य कर्मणः समनुष्ठाता । पतितात्यागी, अपतितत्यागी इत्येते पतिताः भवन्ति । अत्र पुरुषवत् स्त्री अपि पतिता भवति । पातकसंयोजकाः अर्थात् पतनीये कर्मणि ये संयोजयन्ति तेऽपि पातकसंयोजकाः भवन्ति । संयोजकाश्च प्रयोजकानुमन्तृनिमित्तभेदेन भिद्यन्ते । तत्रादौ को नाम प्रयोजकः - अप्रवृत्तस्य प्रवर्त्तकः प्रयोजकः । तत्रापि प्रयोजकः आज्ञापयिता अभ्यर्थयमान उपदेष्टेति त्रिधा। तत्र आज्ञापयिता स्वयमुच्चः सन् नीचं भृत्यादिकं मदीयममित्रं व्यापादयेति प्रेरयति । अभ्यर्थयमानस्तु स्वयमसमर्थः सन् बलवन्तं मदीयं शत्रुं व्यापादयेति निवेदयति । द्वावेतौ स्वार्थसाधकौ भवतः । परन्तु उपदेष्टा शत्रुमित्थं मारयेति मर्मोद्घाटनाद्युपदेशपुरःसरं परार्थं प्रेरयति । परस्परं भिद्यमाना अपि एते हन्तुः प्रवर्त्तकत्वेन प्रयोजकाः भवन्ति । वस्तुतः नैते खड्गस्थानीयाः । अनुमन्तुर्यद्यपि फलेन साकं न सम्बन्धः, न वासौ अप्रवृत्तस्य प्रवर्त्तकस्तथापि तदनुमतिमन्तरा हन्ता हन्तुं न शक्नोति इति । तस्य हिंसायां भागः पूर्वतोऽपि न्यूनोऽस्ति । प्रसङ्गेऽस्मिन् याज्ञवल्क्यस्मृतेः टीकाकारेण विज्ञानेश्वरेण सम्यक् विवेचनं कृतम् । गौतमेन एते सर्वे एव पतिता इति कथितम् । तथा च एभिः ब्रह्महादिभिः अब्दं यावत् यानासनादिव्यापारैः समाचरन् पतितो भवति । परन्तु योनिसम्बन्धादिना अर्थात् विवाहसहभोजनादीना सद्य एव पतति । गौतमेन किं नाम पतनमिति जिज्ञासायां कथितं यत् - द्विजातीनां यानि यजनयाजनादीनि कर्माणिविहितानि तेभ्यः हानिः अर्थात् अधिकारहानिः पतनम् इति । तथा च संसारेऽस्मिन् यथा कर्मस्वनधिकारस्तथा परलोकेऽपि पुण्यकर्मणः फलं न प्राप्नोति । अर्थात् पापेन पूर्वसुकृतं नश्यतीति । केचन आचार्याः तं दुःसहदुःखप्रदायकं नरकमिति वदन्ति । पुरुषस्य पतने यानि करणानि कथितानि स्त्रीया अपि तानि पतननिमित्तानि भवन्ति । परन्तु विशेषतः स्त्री भृणहत्यायां, क्षत्रियादिहीनवर्णपुरुषसेवायां ब्राह्मणादि-उच्चवर्णास्त्री पतिता भवति । गौतमेन कौटसाक्ष्यादीनि महापातकसमानि भवन्ति इति कथितम् । उपपातके गोहत्या पतितसावित्रिको व्रात्य-अवकीर्ण-प्रभृतयः अन्तर्भवन्तीति निरूपितम् । प्रसङ्गेऽस्मिन् गौतमेन इदमपि उपदिष्टं यत् - अज्ञानात् याजनादिज्ञानाभावात् ऋत्विक् त्याज्यः । तथा च अनध्यापनात् आचार्यः हेयः । कारणं विना यदि अनयोः त्यागः क्रियते चेत् तर्हि त्यागकर्त्ता पतितो भवति । कस्यामपि परिस्थितौ मातापित्रोः अशुश्रूषा न कर्तव्या इति तेनैवोपदिष्टम् । त्यागे सति पतितो भवति । मातापित्रोः विनानुमतिं पुत्राः दायं न

भजेरन् यदि विनानुमतिं विभजेयुः तर्हि पुत्राः पतिताः भवन्ति । विद्यमानदोषस्य ब्राह्मणस्य दोषकीर्त्तनं न कर्त्तव्यम् । निर्दोषे दोषकीर्त्तने वक्तुः द्विगुणो दोषः, विद्यमाने यावान् कर्तुः तावान् वक्तुः । दुबर्लस्य रक्षणे समर्थश्चेत् यदि – द्रष्टा न रक्षति तर्हि यावान् कर्तुः दोषः तावान् द्रष्टुः दोषः भवति । ब्राह्मणस्य प्रहाराय दण्डोद्यमनेन वर्षशतमस्वर्ग्यम् । दण्डप्रहारे वर्षाणां सहस्रम्, दण्डप्रहारे जाते लोहितदर्शने सति ब्राह्मणशरीरात् रक्तं निर्गत्य यावतः पांशून् संगृह्णीयात् तावन्तिवर्षसहस्राणि अस्वर्ग्यम् । एवमेव गौतमेन एते विषयाः प्रतिपादिताः ।

| **बोधप्रश्नाः** |
|---|
| १. किं नाम पतनम् ? |
| |
| |
| २. के पतिताः ? |
| |
| |
| ३. स्त्री केन पतिता भवति ? |
| |
| |
| ४. कदा पुत्राः दायं न भजेरन् ? |
| |
| |

## प्रायश्चित्तलक्षणं ज्ञानाज्ञानकृतप्रायश्चित्तानि च –

गौतमेन प्रायश्चित्तनिमित्तानि प्रदर्श्य पापोपशमनार्थं प्रायश्चित्तानि विहितानि । तत्रादौ किं नाम प्रायश्चित्तमिति चेत् – उच्यते आङ्गिरस्मृत्युक्तदिशा यथा –

''प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते ।
तपो निश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम् ।।''

''प्रयतत्त्वादुपचितमशुभं नाशयतीति प्रायश्चित्तम् इति हारितोक्तप्रायश्चित्तलक्षणेन ज्ञायते- यत् पापक्षयं निश्चितं तप इति ।'' ''पापक्षयमात्रसाधनं कर्म प्रायश्चित्तमिति'' शूलपाणिना प्रायश्चित्तलक्षणमकारि । सामान्येन एतद् ज्ञायते यत् येन कर्मणा पापक्षयो भवति तत् प्रायश्चित्तमिति । गौतमेन प्रायश्चित्तविधानप्रसङ्गे सर्वादौ सर्वपापमूर्द्धन्यभूतस्य ब्रह्महत्या-महापातकस्य कृते प्रायश्चित्तम् विहितम् । महापातकानि पञ्च - यथा -ब्रह्महत्या, सुरापानं, गुरुतल्पगमनं संसर्गश्चेति । एतान्यपि ज्ञानाज्ञानभेदेन भिद्यते । ज्ञानकृतब्रह्मवधे ब्रह्मघ्न अनशनेन शोषितकलेवरस्य अग्नौ प्राशनं कुर्यात् । तत्रापि ब्रह्महा लोमादि-मज्जान्तां तनुं वह्नौ त्रिरवाक्शीरा जुहूयात् । अत्र द्रव्याणि लोमादीनि, देवता मृत्युः इति - कल्पितम् । अत्र अनशनकृशस्य शरीरस्य अधोमुखतया त्रिः पतनं क्लेशाधिक्याय इति प्रदर्श्य न पुनर्जीवनायेति स्पष्टीकृतम् । एतत् मरणान्तिकं प्रायश्चित्तं कामकारविषयमिति मन्तव्यम् । यतः ब्राह्मणः कामपूर्वकं ब्रह्मवधं कृत्वा मरणान्तिकं प्रायश्चित्तं कुर्यादिति धर्मशास्त्रकाराणां मतं विद्यते । कश्चनः क्षत्रियः यदि कामपूर्वकं ब्रह्मवधमाचरति तर्हि प्रायश्चित्ती यत्र कुत्रापि संग्रामे प्रवर्त्तमाने धर्ममाश्रयतः पक्षस्य सपक्षोभूत्वा तत् प्रतिपक्षस्य शस्त्रास्त्रपातसमये प्रक्षिप्तस्य शस्त्रस्य वाणस्य वा लक्ष्यं स्यात् । तत्र जीवन्नपि शुद्ध्यति । यतः मृतकल्पो प्रहारार्त्तो जीवन्नपि विशुद्ध्यतीति मनुना कथितत्वात् ।

अज्ञानकृतब्रह्महत्यायां गौतमेन प्रायश्चित्तान्तरं कल्पितम्, यथा - अज्ञानकृतब्रह्मवधे ब्रह्महा द्वादशवर्षाणि यावत् व्रतं कुर्यात् । द्वादशवार्षिकव्रते ब्रह्महा एकस्य दण्डस्य उपरिभागे स्वव्यापादितस्य ब्राह्मणस्य शिरःकपालं ध्वजरूपेण स्वदक्षिणपाणौ धृत्वा ब्रह्मचर्यपालनपूर्वकं स्वाचरितपापकर्म ब्रूवन् ग्रामं भिक्षार्थं प्रविशेत् । अन्यदा अरण्ये गोष्ठे ग्रामान्ते वा निवसेत्। गमनागमनकाले ब्राह्मणादेः दर्शनं कृत्वा स्पर्शभिया मार्गात् अपसरेत् । तथा च स्पृष्टस्यापि प्रायश्चित्तस्मरणं धर्मशास्त्रकारैः कृतत्वात् मार्गात् अपसरणं तेनैव कर्तव्यम्। स च ब्रह्महा दिवा दण्डायमानेन विचरणेन वा रात्रौ उपवेशनेन च अतिवाहयेत् । त्रिषु सवनेषु अर्थात् प्रातः, मध्याह्न, सायं सन्ध्यासु स्नानाचमनं कुर्यात् । व्रतमन्तरा यदि विपन्नं ब्राह्मणं मरणात् मुचयति । तदा स तदानीमेव स्वपापात् मुक्तो भवति । क्षत्रियादिवधहेतुके पूर्वोक्तप्रकारेण आपन्नक्षत्रियादिजीवनरक्षणेन शुद्धिरिति हरदत्तेन कथितम् । चौरादिभिः

अपहृतं धनं यदि स्वशक्त्यनुसारं न्यूनातिन्यूनं त्रिवारं यावत् प्रतिरोध्य विजित्य वा ब्राह्मणाय अर्पयति तर्हि स स्वपापात् मुक्तो भवति । अथवा प्रतिरोधेन क्षतो भवति मृतकल्पो वा तदानीमपि शुद्ध्यति । प्रसङ्गेऽस्मिन् गौतमेन इदमपि उपदिष्टं यत् सार्वभौमेन राज्ञा अनुष्ठितस्य अश्वमेधयागस्यांगभूतेऽवभृथे राज्ञः ब्राह्मणानां वा पुरतः स्वपापं प्रकाश्य तदनुमत्या ब्रह्महा स्नानं करोति चेत् तर्हि स्वपापात् विमुच्यते । अग्निमान् ब्राह्मणः यज्ञान्तरेष्वपि स्नात्वा शुद्ध्यति । ब्राह्मणवधार्थं सर्वविधं उद्योगं कृत्वा यदि उद्योगवान् केनापि कारणेन अहत्वापि प्रायश्चित्ती भवति । यथोक्तं गौतमेन ''सृष्टश्चेत् ब्राह्मणवधे'' अहत्वापि ब्रह्मवधप्रायश्चित्तं शुद्ध्यर्थम् आचरेत् इति । अत्रिगोत्रत्पन्ना अथवा रजस्वला स्त्री आत्रेयीति कथ्यते तस्याः हत्यायां द्वादशवार्षिकं ब्रह्मवधप्रायश्चित्तं शुद्धिकारकं भवति । वस्तुतः अत्र आत्रेयी रजस्वला इति स्वीक्रियते । गर्भवधेऽपि कथितं यत् – स्त्रीं पुं नपुंसकत्वेन अविज्ञातावस्थायां यदि गर्भवधः क्रियते तर्हि ब्रह्मवधप्रायश्चित्तं शुद्ध्यर्थं कुर्यात् । विज्ञाते तु स्त्रीवधोक्तं प्रायश्चित्तं कुर्यात् । यतः अविज्ञाता हि गर्भा पुमांसो भवन्तीति कथितत्वात् । क्षत्रियवधे षड्वार्षिकं कपालधारणादिवर्जितं ब्रह्महत्याप्रायश्चित्तं कृत्वा व्रतान्ते ऋषभएकसहस्रागाश्च ब्राह्मणेभ्यो दद्यात् । इदमेव प्रायश्चित्तं अभिषिक्तक्षत्रियस्य कृते इति गौतमस्य अभिप्रायः । वैश्यवधे त्रैवार्षिकं व्रतं ऋषभैकशताकश्च गाश्च दद्यात् । शूद्रं हत्वा संवत्सरं प्राकृतं ब्रह्मचर्यं प्रपाल्य व्रतान्ते एकं वृषभं दश गाश्च दद्यात् । अग्निहोत्रादि ब्राह्मणस्वामिकां वहुक्षीरां धेनुं हत्वा अथवा कपिलापदवाच्यां धेनुं हत्वा वैश्यवत् प्रायश्चित्तं कुर्यादिति तेनैव प्रत्यपादि । मण्डुक–नकुल–काक–कृकलास–मूषिक–श्वा एषां मण्डुकादीनां पुनः पौन्येन अभ्यस्तायां हत्यायां शूद्रहत्याव्रतं शुद्ध्यर्थं कुर्यात् ।

अस्थिमतां सहस्रं हत्वा शूद्रहत्याव्रतं चरेत् । अस्थिरहितानां दंशमशकमक्षिकादीनां बलीबर्दवहनयोग्ये भारे निहते शूद्रवधप्रायश्चित्तम् अनुष्ठेयम् । अस्थिमताम् एकैकशः वधे किञ्चित् अर्थात् अष्टमुष्टिपरिमितं धान्यं शस्यादिकं वा तदनुरूपं वा दद्यात् । किञ्चित् स्वरूपं प्रदर्शितं यथा – ''अष्टमुष्टि भवेत् किञ्चित्'' इति । नपुंसकवधे पलालभारः अर्थात् व्रीहिशून्यः स्तम्बः, तस्य भारः, पुरुषवाह्यः, ब्राह्मणेभ्यो देयः । तथा च तत्र सीसमाषश्च देयः इति गौतमेन उपदिष्टम् । हिंसाप्रायश्चित्तविवेचनावसरे गौतमेन उक्तं यत् वराहवधे घृतघटः, सर्पे लौहदण्डः, ब्रह्मबन्धूः अर्थात् जातिमात्रब्राह्मणी तस्यां व्यभिचारिण्यां हतायां नीलवृषो देयः

(नीलवृषस्य लक्षणं विद्यते) । उद्वाहस्य विघ्नोत्पादने, ब्राह्मणादीनां धनलाभादिषु विघ्नोत्पादने, च त्रीणि वर्षाणि प्राकृतं ब्रह्मचर्यम् । जातिमात्रब्राह्मणस्य अनृतुकाले दारगमने वर्षद्वयं प्रायश्चित्तं विहितम् । तथैव श्रोत्रियस्य भार्यायां गमने त्रीणि वर्षाणि प्राकृतं ब्रह्मचर्यम् गौतमेन उपदिष्टम् । अधर्ममार्गेण द्रव्यलाभे पतितादियाजने च द्रव्यत्यागपूर्वकं संबत्सरं ब्रह्मचर्यव्रतम् अनुष्ठेयम् । अग्नौ हवनं, सामर्थ्येसति अकृत्वा वेदाध्ययनं अकृत्वा च संवत्सरं ब्रह्मचर्यव्रतं अनुष्ठेयम् । या स्त्री व्यभिचारिणी सा न भत्रा निष्कासनीया, अपि तु ग्रासाछादनप्रदानपूर्वकं समीपे कुटीरादौ संरक्षणीया । मेषमहिष्यादिषु मैथुने कृते कुष्माण्डैः घृतहोमः कार्यः एवमेव प्रायश्चित्तानि यथाशास्त्रम् उपदेष्टव्यानि इति ।

| **बोधप्रश्नाः -** |
|---|
| १. किं नाम प्रायश्चित्तम् ? |
| |
| |
| २. ब्रह्मवधव्रतं कति वर्षाणि ? |
| |
| |
| ३. का आत्रेयी ? |
| |
| |
| ४. क्षत्रियवधे किं कार्यम् ? |
| |
| |
| ५. नपुंसकवधे किं देयः ? |
| |
| |

## सारांशः -

प्रियपाठकाः ! अस्मिन् खण्डे नैमित्तधर्मविचारप्रसंगे किं नाम निमित्तं, तदुत्पत्तये कानि कारणानि अनुष्ठिते प्रायश्चित्ते पापक्षयो भवति न वा इत्यादिविषयाः प्रतिपादिताः । ततः पापशोधकानि सम्यक् विविच्य पातकिसंसर्गनिवारणोपयाः प्रदर्शिताः । धर्मसूत्रकारीण गौतमेन नैमित्तिकधर्माः प्रतिपादिताः । तत्रादौ किं नाम निमित्तमिति प्रतिपाद्य तदुत्पत्तये कारणानि-विहितानि । पुण्यात्मकस्य पापात्मकस्य वा कर्मणः फलं विद्यते एव । अस्मिन् खण्डे नैमित्तिकधर्मविचारप्रसङ्गे सर्वादौ के पतिताः इति प्रतिपाद्य, पातकसंयोयकाः विचारिताः। ततः किं नाम पतनमिति विविच्य पतनकारणानि प्रदर्शितानि । ततः प्रायश्चित्तनिमित्तकथनानन्तरं किं नाम प्रायश्चित्तमिति आंगिरसोक्तदिशा प्रायश्चित्तलक्षणं प्रत्यपादि । तदनु ज्ञानकृतब्रह्मवधक्षत्रियवधप्रायश्चित्तञ्च निरूप्य अज्ञानकृतब्रह्मवधादिप्रायश्चित्तं सम्यक् विवेचितम् । ततः ब्रह्महत्यासमानपातकानां कृते प्रायश्चित्तं प्रदर्श्य हिंसाकृतवधे प्रायश्चित्तानि प्रदर्शितानि । ततः अस्थिमतां अनस्थिमतां च वधे प्रायश्चित्तं प्रदर्श्य प्राणिवधादौ अपि प्रायश्चित्तानि विहितानि । तदनु जातिमात्रब्राह्मणिवधादौ प्रायश्चित्तमपि प्रदर्शितम् ।

## पारिभाषिकशब्दाः -

याप्यम् – निन्द्यम्
मीमांसा – पूज्यविचारः
ब्रह्मचर्यम् – मैथुत्यागः
योनिसम्भन्धाः – जामातृभागिनेयमातुलादयः
अवकरः – अमेध्यसंचयस्थानम्
प्राचीनावीतिः – दक्षिणस्कन्धधृतयज्ञापेवीतः
व्रात्यः – मुख्ये गौणे काले वा अनुपनीतः
शिष्टस्याक्रिया – शास्त्रविहितस्यानाचरणम्
पापस्य निष्क्रयणम् – पापशोधकम्
ब्रह्मा – ब्रह्मणहन्ता
स्तेनः – ब्राह्मणस्य सुवर्णपरिमितस्य सुवर्णस्य अपहर्त्ता

| | | |
|---|---|---|
| पतनम् | - | द्विजातिकर्मभ्यो हानिः |
| आत्रेयी | - | रजस्वला स्त्री |
| किञ्चित् | - | अष्टमुष्टिः (परिमाणविशेषः) |
| अवच्छातस्य | - | अनशनशोषितकलेवरस्य |
| स्थानम् | - | उत्थानम् |
| विम्बः | - | कामरूपी कृकलासः |

## आदर्शप्रश्नाः -

**निबन्धात्मकप्रश्नाः** - (प्रत्येकं २०/१५ अङ्काः)

१. याप्यकर्माणि विलिख्य प्रायश्चित्तेन पापक्षयो भवति नवेति विवेचयत ।

२. पातकिसंसर्गनिवारणोपायान् प्रतिपादयत ।

३. पापोपशमनकारणानि यथाग्रन्थं विमृशत् ।

४. यथाशास्त्रं पतितान् निरूप्य पातकसंयोजकान् प्रतिपादयत ।

५. ज्ञानकृतब्रह्मवधप्रायश्चित्तं विमृशत ।

६. प्रायश्चित्तलक्षणं विलिख्य अज्ञानकृतब्रह्मवधप्रायश्चित्तं विवेचयत ।

**विश्लेषणात्मकप्रश्नाः** - (प्रत्येकं १२/१० अङ्काः)

१. 'न हि कर्म क्षीयत' इत्युक्तेः यथार्थतां प्रकाशयत ।

२. याप्ये कर्मणि कृते प्रायश्चित्तं कर्त्तव्यं नवेति ?

३. पावमानानि यथाग्रन्थं प्रतिपादयत ।

४. पतितत्यागविधिं स्पष्टीकुरुत ।

५. 'एनः सु गुरुषु गुरुणि लघुषु लघूनि'- इतिसूत्रं व्याख्यात ।

६. कानि महापातकानीति विमृशत ।

७. उपपातकं यथाशास्त्रं प्रतिपादयत ।

८. अस्थिमतामनस्थिमतां च वधे प्रायश्चित्तं निरूपयत ।

९. क्षत्रियवधे - वैश्यवधे च प्रायश्चित्तं प्रतिपादयत ।

**लघुप्रश्नाः** - (प्रत्येकं ५ अङ्काः)

टिप्पणी प्रदेया -

तपांसि, मेध्यानि, याप्यकर्माणि, पापनिष्क्रयणानि, निमित्तधर्मः, प्रायश्चित्तम्, गुरुतल्पगः, सुरापः, पतिताः, उपपातकम्, भ्रूणहत्याप्रायश्चित्तम्, शूद्रवधप्रायश्चित्तम् ।

**एकाङ्कप्रश्नाः** – (प्रत्येकं १ अङ्कः)

१. किं नाम याप्यं कर्म ?

२. किं नाम पतनम् ?

३. किं नाम तपः ?

४. किं नाम नैमित्तिकम् ?

५. कति पावमानानि ?

६. गुरुषु पातकेषु किम्भूतानि प्रायश्चित्तानि ?

७. 'अवकरः' इत्यस्य कोऽर्थः ?

८. स्मार्त्तधर्मः कतिविधिः ?

९. कः व्रात्यः ?

१०. 'शिष्टस्याक्रिया' इत्युक्ते कोऽर्थः बोध्यते ?

११. अनादिष्टेषु प्रापेषु शुद्ध्यर्थं किं करणीयम् ?

१२. ब्रह्महा कः ?

१३. कः सुरापः ?

१४. कः गुरुतल्पगः ?

१५. स्तेनः कः ?

१६. कः नास्तिकः ?

१७. किं नाम पतनम् ?

१८. महापातकसमानि कानि ?

१९. का आत्रेयीति कथ्यते ?

२०. अज्ञानकृतब्रह्मवधप्रायश्चित्तं कति वर्षात्मकम् ?

२१. सर्पवधे किं दद्यात् ?

२२. ''ब्रह्मबन्धूः'' इत्यस्य कोऽर्थः बोध्यते ?

**एकाङ्कप्रश्नानामुत्तराणि** – १. निन्द्यम्, २. द्विजातिकर्मभ्यो हानिः, ३. शरीरं प्रति क्लेशदानम्, ४. प्रायश्चित्तम्, ५. एकविंशतिः, ६. गुरुणि, ७. अमेध्यसंचयस्थानम्, ८. षड्विधिः, ९. शास्त्रोक्तकालेषु अनुपनीतः वालः, १०. शास्त्रोक्तस्य अक्रिया अनाचरणम् वा, ११. कृच्छ्रातिकृच्छ्रौ चान्द्रायणञ्च, १२. ब्राह्मणं हतवान् इति, १३. सुरायाः पाता, १४. गुरोः तल्पं अर्थात् लक्षणया भार्यां गच्छतीति, १५. ब्राह्मणसुवर्णापहर्त्ता, १६. नास्ति परलोक इति मतिर्यस्य सः, १७. द्विजातिकर्मभ्यो

हानिः, १८. कौटसाक्ष्यादीनिः, १९. रजस्वला नारी, (अत्रिगोत्रोप्तन्ना वा), २०. द्वादश, २१. लौहदण्डम्, २२. जातिमात्रब्राह्मणी ।

❖❖❖

## (UNIT - V)
## तृतीयप्रश्नस्य पञ्चमाध्यायात् दशमाध्यायं यावत्

### प्रस्तावना

महापातकानि पञ्च यथा - ब्रह्महत्या, सुरापानं, गुरुतल्पगमनं, सुवर्णस्तेयः, संसर्गेश्च। पञ्चसु महापातकेषु पूर्वस्मिन् खण्डे ब्रह्मवधमहापातस्य प्रायश्चित्तं विवेचितम्, खण्डेऽस्मिन् अवशिष्टानामन्येषां सुरापादीनां महापातकानां स्वरूपं तत् प्रायश्चित्तञ्च विचार्यते । सुरापानादिप्रायश्चित्तानां निर्णयप्रसङ्गे अन्येषामपि अमेध्यादिप्राशनेभक्षणे च संञ्चितपापानां प्रायश्चित्तानि प्रदर्शितानि । ततः रहस्यप्रायश्चित्तविचारप्रसंगे किं नाम रहस्यं प्रायश्चित्तं, तत्र किं प्रायश्चित्तमनुष्ठेयम् इत्यादि यथाशास्त्रं विचारितम् । ततः उपपातेकषु अवकीर्णिप्रायश्चित्तं सम्यग्रूपेण विवेचितम् । धर्मशास्त्रे प्रमुखरूपेण विवेचितेषु विषयेषु आचार-व्यवहार-प्रायश्चित्तानां महत्वं सुविदितमेव विदुषाम् । स्मृतिग्रन्थेषु विषयविवेचनं क्रमवद्धतया जातम् । परन्तु गौतमप्रणीते धर्मसूत्रेऽस्मिन् अक्रमिकतया विषयविवेचनं प्राप्यते । गौतमेन प्रायश्चित्तविधानानन्तरं कृच्छ्रादिव्रतानि प्रतिपादितानि । तेषां स्वरूपम् अस्मिन् खण्डे विचार्यते । तत्र कृच्छ्रमिति कथनेन प्राजापत्यमिति बोध्यते । अतएवात्र कृच्छ्रचान्द्रायणप्रभृतीनां विवेचनं कृत्वा व्यवहारान्तर्गतनां स्वत्वादिविषयाणां प्रतिपादनं क्रियते । तत्रापि विभागकालनिरूपणपूर्वकं पुत्राणां भागकल्पना कृता ।

### उद्देश्यकथनम् -

- सुराशब्दस्यार्थं सुरापानप्रायश्चित्तं अमेध्यादिप्राशनपायश्चित्तञ्च ज्ञातुं शक्नुवन्ति ।
- गुरुतल्पगमनप्रायश्चित्तं निर्णेतुं प्रभवन्ति ।
- रहस्यप्रायश्चित्तं विचारयिष्यन्ति ।

- उपपातके अवकीर्णिप्रायश्चित्तं तदनुष्ठानविधिश्च प्रतिपादयितुं शक्नुवन्ति ।
- कृच्छ्र अतिकृच्छ्र - कृच्छ्रातिकृच्छ्राणां स्वरूपमालोचिष्यन्ति ।
- चान्द्रायणव्रतविचारं करिष्यन्ति ।
- पितुः धनविभागकालं भ्रातृणां विभागश्च आलोचयिष्यन्ति ।
- अपुत्रधनविभागक्रमं स्त्रीधनञ्च ज्ञातुं प्रभवन्ति ।
- पुत्रेषु के रिक्थभाजः के च गोत्रभाजः भवन्ति निर्णेतुं शक्नुवन्ति ।

## सुराशब्दस्यार्थः तत् प्रायश्चित्तञ्च -

सुराशब्दः मुख्यतया पैष्टयामेव रूढः । मनुना कथितं यत् - ''गौडी पैष्टी च माध्वी-च विज्ञेया त्रिविधा सुरा । यथैवेका तथा सर्वा न पातव्या द्विजात्तमैः । एवं भूतां सुरां यः पिवति स सुरापः । तस्य सुरापस्य मुखे उष्णां अर्थात् प्रप्रतप्तां सुराम् आसिञ्चेयुः । मनुना कथितं यत् प्रतप्तां सुरां पिवेदिति । गौतममतानुसारं शौण्डिका राजपुरुषा वा आसेचनकर्त्तारः भवन्ति । स्वयं पातुमशक्तत्वात् अत्र परकर्त्तृकमासेचनं विहितम् । ब्राह्मणादयोऽपि सुरां न स्पृशयेयुः । अतः शौण्डिकैः तत् कर्त्तव्यम् । तथा च सुरापः आद्रवस्त्रपरिधानपूर्वकं लौहेन पात्रेण पिवेदिति धर्मशास्त्रकारैः कथितम् । एतत् मतिपूर्वपाने मरणान्तिकं प्रायश्चित्तम् उपदिष्टम् । अमत्या पाने कृते पयः क्षीरं घृतम् उदकं वायुः चेति प्रति त्र्यहं त्र्यहं तप्तानि कृत्वा पिवेत् । एतत् तप्तकृच्छ्रव्रतमिति कथ्यते । व्रतान्ते प्रायश्चित्तिनः पुनः संस्कारोऽपि कर्त्तव्यः । सूक्ष्माटीकायां सुरामद्ययोः भेदः प्रदर्शितः । मद्यानि एकादशप्रकारकाणि भवन्ति । द्वादशं तु सुरामद्यं सर्वेषां निकृष्टतमम् । यथा - पानसं द्राक्षमाधूकमित्यादि । मूत्रपुरीषरेतसाम् एकस्यापि प्राशने तप्तकृच्छ्रः पुनरुपनयनञ्च कर्त्तव्यम् । व्याघ्र-उष्ट्र-गर्दभादीनां मांसमूत्र-पुरीषदुग्धादीनां भक्षणे तप्तकृच्छ्रः पुनरुपनयनञ्च शुद्ध्यर्थमनुष्ठेयम् । तपश्च ग्राम्यकुक्कुटस्य ग्राम्यसूकरस्य मांसभक्षणे तप्तकृच्छ्रं पुनः संस्कारं च शुद्ध्यर्थं कुर्यादिति । सुरापस्य मुखगन्धाघ्राणे प्राणायामाः घृतप्राशनञ्च पूर्ववत् कार्यम् । गौतमेन प्रसङ्गेऽस्मिन् इदमपि कथितं यत् - व्याघ्रादिश्वापद-उष्ट्र-गर्दभ-ग्राम्यशूकरैः यदि कश्चन दष्टः भवेत्, तर्हि प्राणायामैः घृतप्राशनैश्च शुद्धो भवेदिति । एवमेव सुरापानप्रायश्चित्तनिरूपणप्रसंगे अमेध्यादीनां प्राशने निषिद्धमांसानां भक्षणे श्वापदादिभिः दंशने च शुद्धिहेतवः प्रतिपादिताः ।

| **बोधप्रश्नाः** |
|---|
| १. का मुख्या सुरा ? |

| |
|---|
| |
| |
| २. सुरापः केन शुद्ध्यति ? |
| |
| |
| ३. मूत्रपुरीषप्राशने किं शुद्ध्यर्थं कर्त्तव्यम् ? |
| |
| |

## गुरुतल्पगमनप्रायश्चित्तम् -

गुरुभार्यागामी गुरुतल्पगः इति कथ्यते । मनुवचनानुसारं ज्ञायते यत् - निषेकादीनि कर्माणि यः कराति स पिता गुरु भवतीति । अतः पितृपत्नीगमनेन महापातकं भवति । परन्तुगौतमेन ''आचार्यः श्रेष्ठो गुरुणाम्'' इति गुरुवर्गे आचार्यस्यैव श्रेष्ठत्वं प्रतिपादितम् । विष्णुना एतदेव विचार्य कथितं यत् सर्वगुरुश्रेष्ठायां जनन्यां गमनं महापातकापेक्षया गुरुतरमतिपातकं भवति इति । यद् भवतु, गुरुतल्पगः - गुरुभार्यागामी तप्ते मरणयोग्ये लौहपट्टे शयीत । तत्र मरणात् पूतो भवतीति गौतमेन कथितम् । अत्र प्रकारान्तरेण इदमपि प्रायश्चित्तान्तरं विहितं यथा - गुरुतल्पगः लौहमयीं स्त्रीप्रतिकृतिं अग्निवर्णां कृत्वा ताम् आलिङ्गेत् मृत्युं यावत् । अथवा गुरुतल्पगः स्वस्य जनेनन्द्रियं बीजकोषसहितम् उत्कृत्य अञ्जलौ संस्थाप्य दक्षिणपश्चिमकोणं प्रति अकुटीलगत्या शरीरनिपातपर्यन्तं गच्छेत् । एभिः ज्ञायते यत् मरणात् शुद्धिरिति । सखीसयोनिसगोत्रशिष्यभार्यासु पुत्रभार्यायां गवि वा गमने गुरुतल्पसमः भवतीति गौतमेन विहितम् । अत्र दोषसाम्यात् प्रायश्चित्तसाम्यं कल्पनीयम् । विद्वांसः सर्वत्रैव अतिदेशिके पादन्यूनं प्रायश्चित्तं कल्पयन्ति । केचन अपकीर्णिप्रायश्चित्तमपि प्रसङ्गेऽस्मिन् वदन्ति । तत्र उच्चवर्णा स्त्री अर्थात् ब्राह्मणी यदि शुद्रपुरुषं गच्छति तर्हि तां नीचगामिनीं स्त्रियं राजा कुक्कुरैः खादयेदिति । पुमांसमपि राजा घातयेत् ।

अवकीर्णिप्रायश्चित्तविचारप्रसंगे गौतमेन कथितं यत् - अवकीर्णी स्खलितव्रतब्रह्मचारी चतुष्पथे निऋतिदेवतोद्देश्येन काणेन गर्दभेन पशुना रात्रौ यजेदिति । स चावकीर्णी काणेन गर्दभेन यागं सम्पाद्य तदजिनं उर्ध्वं प्रति लोमानि यथा स्युः तथा परिधाय लोहितपात्रेण सप्तगृहेभ्यः स्वकर्मकथनपूर्वकं भिक्षां यायेत । एवमेव संवत्सरेण

स शुद्ध्येदिति, सूर्योदयकाले सूर्यास्तकाले वा सुप्तः ब्राह्मचारी सम्पूर्णं दिवसमुपवासेन स्थित्वा रात्रौ सावित्रीं जपेत् ।

केशकीटादियुक्तमन्नादिकं भुंक्त्वा त्रिरात्रमुपवसेत् । पञ्चनखभिन्नानाम् अभक्ष्याणां भक्षणे वमनं घृतप्राशनं च विहितम् । एवमेव आक्रोशे, अनृतभाषणे च कृते आज्यहोमः कर्त्तव्यः । परन्तु विवाहादिषु मृषाभाषणे कृते दोषाभावः गौतमेन कथितः । यदि चाण्डाली आत्मानं शूद्रजातीयामिति प्रकाशयति, तत्र अमत्यागमनं सम्भवति । अतः तत्र द्वादशरात्रं यावत् प्राजापत्यव्रतं शुद्ध्यर्थं मनुष्ठेयम् । तथा च मतिपूर्वकगमने संवत्सरं यावत् प्राजापत्यमनुष्ठेयमिति गौतमेन उपदिष्टम् ।

| **बोधप्रश्नाः** |
| --- |
| १. गुरुतल्पगः केन शुद्ध्येत् ? |
| |
| |
| २. नीचगामिनीं स्त्रियं राजा किं कुर्यात् ? |
| |
| |
| ३. अवकीर्णी कुत्र यागं कुर्यात् ? |
| |
| |
| ४. केशकीटादियुक्तमन्नं भुक्त्वा किं कुर्यात् ? |
| |

## रहस्यप्रायश्चित्तम् -

गौतमेन प्रकाशप्रायश्चित्तं प्रतिपाद्य रहस्यप्रायश्चित्तमपि विवेचितम् । रहसि भवं रहस्यं गोपनीयमित्यर्थः । अत्र रहस्यमिति यदुक्तं तत् प्रायश्चित्तस्य विशेषणम् ।

अविख्यातदोस्य अर्थात् न विशेषेण प्रकाशितदोषस्य कृते रहस्यं प्रायश्चित्तं विहितम् । अप्रतिग्राह्यं प्रतिगृहीतुमिच्छन् प्रतिगृह्य वा तरत्संमन्दीत्याद्या चतस्रः ऋचः जले दण्डायमानः सन् जपेत् । तथा च केशकीटादियुक्तं भावदुष्टं वा अभोज्यं भोक्तुमिच्छन् द्रव्ये मृत्तिकां प्रक्षिप्य खादेत् । अत्रायं निर्देशः आपत्कल्परूपेण विहितः । ऋतुकाले स्त्रीगमनं कृत्वा सचैलस्नानं कुर्यात् ।

ब्राह्मणवधे प्रथमदशरात्रं क्षीरमात्रपानेन, द्वितीयदशरात्रं घृतप्राशनेन, ततः दशरात्रम् जलपानेन उपोश्य जलक्लिन्नवस्त्रं परिधाय ''ओं लोमानि मृत्योर्जुहोमि लोमभिः मृत्युं वासय'' इत्यादि लोमप्रभृति (त्वक्-लोहितं-मासं, स्नायुः, मेदः, अस्थि - मज्जा) मज्जान्तां तनुं जुहूयात् । गौतमेन कथितम् यत् - लोमानि ....... त्वचं मांसं शोणितं स्नायु - अस्थि मज्जानमिति होमा आत्मनो मुखे मृत्यो रास्ये जुहोमीत्यन्ततः सर्वेषां प्रायश्चित्तं भृणहत्यायाः इति । पूर्वोक्तप्रयोव्रतेन साकं कुष्माण्डैः आज्यहोमोऽपि गौतमेन कथितः । प्रसङ्गेऽस्मिन् गौतमेन पयोव्रतादिरूपं मासात्मकं व्रतमपि विहितम् । अन्तर्जलेअधमर्षणम् ''ऋतं च सत्यं चेत्यादि'' त्रिवारम् आवर्त्तयन् सर्वपापेभ्यो विमुच्यते जपकर्त्ता इति तेनैव उपदिष्टम् । एवमेव रहस्यप्रायश्चित्ते सावित्रीं सहस्रकृत्व आवर्त्तयन् आत्मानम् पवित्रीकरोति जपकर्त्ता इति गौतमेन प्रतिपादितम् ।

| **बोधप्रश्नाः** |
| --- |
| १. किं नाम रहस्यप्रायश्चित्तम् ? |
| |
| |
| २. आपदि अभोज्यं भोक्तुमिच्छन् भोक्ता किं कुर्यात् ? |
| |
| |
| ३. सर्वपापेभ्यो विमुच्चते कः ? |
| |
| |

## अवकीर्णिप्रायश्चित्तम् -

अवकीर्णि स्खलितव्रतो ब्रह्मचारी कतिभिः प्रकारैः किं किं प्रविशति इति शंकायां उच्यते यत् - अवकीर्णि प्राणापानादिभिः पञ्चभिः वायून् प्रविशति । अर्थात्

तस्य व्रतभ्रष्टस्य ब्रह्मचारिणः प्राणाः वायुं प्रति गच्छति, अर्थात् प्राणशक्तिः क्षीयते । वलं इन्द्रं प्रति, ब्रह्म, तेजः वृहस्पतिं प्रति, अन्यत् सर्वम् अग्निं प्रति प्रविशति – इव कल्प्यते । अर्थात् अवकीर्णि प्राणादिभिः वियुज्यते । अतः प्राणादिप्राप्त्यर्थं स्वाचरितदोषविमोचनार्थं प्रायश्चित्तं कर्त्तव्यमिति । तत्र प्रायश्चित्तं यथा – अवकीर्णि अमावास्यायां निशीथे लौकिकम् अग्निम् अग्रे संस्थाप्य आज्येन जुहूयात् । तत्र मन्त्रद्वयं यथा –

(१) मुक्तं कामेति कामेन देवेन अवकीर्णः कामेन नीचैः विक्षिप्तः अस्मि अहमिति । सर्वथा अधो विक्षिप्तः अस्मि । यः कामं कामयते स कामकामः कामनियन्ता इत्यर्थः प्रतीयते । तस्मै देवाय स्वाहा सुहुतमस्तु ।

(२) कामेन देवेन कामेन हेतुना वा अभिदुग्धः प्राणादिभिः अभितोरिक्तीभूतः अस्मि । अतः प्राणादीनां पूरणाय कामकामाय स्वाहा इति । एवमेवावकीर्णिप्रायश्चित्तम् अनुष्ठेयमिति तत्रैव कथितम् । कुटिलतादिषु अपि आपोहिष्ठेति मन्त्रमुच्चार्य सचैलस्नानं विहितम् । परन्तु पापाधिक्ये मन्त्राधिक्यं कल्पनीयम् । वाचिकमानसिकपापयोः कृतेऽपि भूराद्याः सत्यान्ताः पञ्चव्याहृतयः जपे होमे च विनियोक्तव्याः । एवमेव जपहोमादिभिः रहस्यपापानामपनोदनं भवतीति प्रतिपादितम् ।

| **बोधप्रश्नाः** |
|---|
| १. अवकीर्णि कतिभिः प्रकारैः कुत्र प्रविशति ? |
| |
| |
| २. अवकीर्णी कदा जुहूयात् ? |
| |
| |
| ३. कः अवकीर्णीति कथ्यते ? |
| |

## कृच्छ्रः/अतिकृच्छ्रः, कृच्छ्रातिकृच्छ्रश्च –

प्राजापत्यव्रतं कृच्छव्रतमिति कथ्यते । व्रतेऽस्मिन् त्र्यहं प्रातः भोजनं कृत्वा, तथैव त्र्यहं सायं, तथा च त्र्यहम् अयाचितम् प्रपाल्य त्र्यहं, सम्पूर्णरूपेणोपवसेदिति

ज्ञायते । अत्र गौतमेन स्पष्टीकृतं यत् - प्रथमं दिनत्रयमेकभक्तं हविष्येण प्रपाल्य, अर्वात् - दिवैव वारमेकम् अश्नीयात्, रात्रौ नाश्नीयात्, दिवा च मध्याह्नात् परं सार्द्धमुहूर्त्तं भोजनकालः, ततः परस्मिन् दिनत्रये रात्रौ एव भुञ्जीत न दिवा । अथ दिनत्रये न कंचन कांचन वा याचेत । अयाचितभावेन यत् प्राप्यते तत् ग्राह्यम् । अत्र कालनियमो नास्ति । ततः दिनत्रये उपवासः, करणीयः । गौतमेन प्रसंगेऽस्मिन् इदमपि कथितं यत् यदि कश्चन क्षिप्रकामः भवेत्, तर्हि दिवा उत्थानेन रात्रौ उपवेशनेन कालं यापयेत् । अत्र सत्यमेव वदेत् । अनार्य्यैः सह वार्त्तालापं न कुर्यात् । त्रिषु सवनेषु स्नानशीलः भवेत् । आपोहिष्ठेति मन्त्राणामुच्चारणपूर्वकं शिरसि जलमार्जनं कुर्यात् । तत्र मन्त्राः गौतमेन विहिताः । यथा - नमोहमाय - मोहमाय मंहमाय धुन्वते तापसाय पुनर्वसवो नयः, इत्यादि । अत्रभगवतः शङ्करस्य सूर्यस्य च उपस्थापनं कृत्वा आज्याहुतिः कर्त्तव्या । अत्र गौतमेन त्रयोदशमन्त्रैः सूर्यस्तवनं प्रतिपादितम्, सूर्यस्तवनमपि दण्डायमानो भूत्वा कर्त्तव्यम् । द्वादशरात्रस्यान्ते त्रयोदशे अहनि ब्रीहिमयं चरुं श्रपयित्वा अग्न्यादिभ्यो नवभ्यो देवताभ्यो नवाहुती र्जुहुयात् । चरुहोमसम्पादनानन्तरं यथाशक्ति ब्राह्मणानां ब्राह्मणयोः ब्राह्मणस्य वा भोजनदानेन, वस्त्रालंकारादिदानेन च सन्तोषविधानं कृत्वा आचार्याय दक्षिणादानमपि कर्त्तव्यम् । एवमेव प्राजापत्यविधिना अतिकृच्छ्रोऽपि प्रतिपादितः । कृच्छ्रे य एव विधिः अतिकृच्छ्रे स एव विधिः, परन्तु अन्नं सकृत् अश्नीयात् इति । कृच्छ्रातिकृच्छ्रे भोजनस्थाने आप एव भक्ष्याः भवन्ति । प्रसङ्गेऽस्मिन् गौतमेन कथितं यत् - प्रथमं चरित्वा पवित्राचारसम्पन्नो भवति । द्वितीयं चरित्वा महापातकेभ्यो, प्रमुच्यते, तृतीयं चरित्वा सर्वस्मात् मुच्यते इति । एवमेव प्राजापत्यम्, अतिकृच्छ्रम्, कृच्छ्रातिकृच्छ्रम् अत्र विवेचितम् ।

| **बोधप्रश्नाः** |
| --- |
| १. कृच्छ्रशब्दस्य कोऽर्थः ? |
| |
| |
| २. प्राजापत्यव्रतं कति दिनात्मकम् ? |
| |
| |
| ३. किं नाम त्रिसवनम् ? |

| |
|---|
| |

## चान्द्रायणव्रतम् -

चन्द्रस्य अयनमिव क्षयवृद्धिक्रमेण भोजनस्य क्षयवृद्धिक्रमो यस्य व्रतस्य यस्मिन् व्रते वा प्राप्यते तत् चान्द्रायणमिति कथ्येत । कृच्छ्रव्रतनिरूपणप्रसंगे ये नियमाः प्रतिपादिताः सन्ति, त एव त्रिषवणस्नानमार्जनतर्पणोपस्थानहोमादयः व्रतेऽस्मिन् अनुष्ठेयाः । परन्तु व्रतेऽस्मिन् आदौ नाम व्रतारम्भे वपनं कर्त्तव्यम् । तत्र कृच्छ्रव्रतेषु तु एतत् न विद्यते, प्रायश्चित्तार्थचान्द्रायणे वपनं कर्त्तव्यम् । पूर्णिमायाः पूर्वस्मिन् दिने अर्थात् चतुर्दश्यां तिथौ उपवासं कृत्वा मुण्डनं कुर्यात् । तत्र ''आप्यायस्व'' – ''सं ते पयांसि'', ''नवो नव'' इति तिसृभिः ऋग्भिः तर्पणम्, आज्यहोम, हविषः अनुमन्त्रणम्, चन्द्रमसः उपस्थानञ्च कर्त्तव्यम् । यद्देवा देव हेडनमिति चतुसृभिः ऋग्भिः आज्यहोमं कृत्वा ततः देव कृतस्येति प्रतिपादितमन्त्रैः समिद्धोमं कुर्यात् । तत्रापि भूरादिभिः प्रणवैः पञ्चदशग्रासान् अभिमन्त्र्य क्रमेण भोजनं कर्त्तव्यम् । अथवा सर्वान् ग्रासान् नमः इति वा स्वाहा इति वा कथनपूर्वकम् अनुमन्त्रयेत् । ग्रासप्रमाणम् आस्यस्य अविकारेण गलप्रवेशयोभ्यम् अश्नीयात् । चान्द्रायणव्रते हविष्यार्थं चरुभैक्षसक्तुकणयावकशाकपयोदधिघृतमूलफलोदकानि उत्तरोत्तरं प्रशस्तानि भवन्ति । चरुः नाम अर्द्धपक्वमन्नम् । पौर्णमास्यां तिथौ पञ्चदशग्रासान् यथाविधि भुक्त्वा ततः परम् एकापचयेन कृष्णपक्षम् अश्नीयात् । अमावास्यायाम् उपोष्य एकैकग्रासवृद्ध्या शुक्लपक्षम् अश्नीयात् । एतादृशस्य चान्द्रायणस्य नाम पिपीलिकामध्यचान्द्रायणमिति । यत्र शुक्लपक्षादि – अमावास्यान्तमपि चान्द्रायणं भवति, तत् यवमध्यचान्द्रायणमिति ।

यत्र प्रत्यहमष्टग्रासभोजनं कृत्वा व्रतपालनं भवति, तत् यतिचान्द्रायणमिति, प्रातश्चत्वारः ग्रासाः सायं चत्वारो ग्रासाः मिलित्वा अष्टौग्रासाः भवन्ति । इत्येवं प्रकारेण व्रतेन शिशुचान्द्रायणं भवति । एवमेव चान्द्रायणव्रतमनुष्ठानेन जन्मान्तरकृतपापमपि नश्यतीति । द्वितीयं चान्द्रायणं कृत्वा पित्रादीन् दशपुत्रादीन् आत्मानं च सम्भूय एकविंशं च पुनातीति गौतमेन उपदिष्टम् । सम्पूर्णं संवत्सरं चरित्वा चन्द्रस्य लोकमपि प्राप्नोति । एवमेव चान्द्रायणव्रतं विवेचितम् ।

| **बोधप्रश्नाः** |
|---|
| १. चान्द्रायणे वपनं कदा कर्त्तव्यम् ? |

| |
|---|
| |
| |
| २. चान्द्रायणे कस्य देवस्योपस्थानं भवति ? |
| |
| |
| ३. चान्द्रायणव्रतं कति मासात्मकम् ? |
| |
| |

## धनविभागकाल:

गौतमेन पुत्राणां धनविभागकालः प्रदर्शितः । तेनोक्तं यत् - औरसा अनौरसाश्च पुत्राः पितुः मरणानरं आश्रमान्तरं वा गते पतिते वा पितुः पितामहादीनां च धनं विभज्य गृहणीयुः । अत्र पुत्रशब्दश्च पुत्रपौत्रादिपरकः, पौत्रादीनां स्वपित्रादिद्वारेणैव - भागार्हत्वात् । अत्र विभागः न विधिः नवा नियमः, परन्तु परिसंख्येति । प्रथमतः रागप्राप्तत्वात्, द्वितीये विभागाकरणे दोषापत्तेरभावात्, तृतीये तु यदि पुत्राः विभागमिच्छेयुः तर्हि पूर्वोक्तनियमः स्वीकर्त्तव्यः इति परिसंख्या । विभागे पक्षान्तरमपि गौतमेन कथितम् । यथा - निवृत्ते चापि रजसीति सूत्रानुसारं मातरि निवृत्तरजस्कायां पितरि धननिस्पृहे तदनिच्छयापि पुत्राणामिच्छया विभागो भवति । ततः ''जीवति चेच्छति'' इतिसूत्रानुसारं जीवति पितरि पितुरिच्छया विभागो भवति अत एव गौतममतानुसारं ज्ञायते यत् पितुः पितामहादीनां च धनविभागार्थम् एते कालाः भवतीति । गौतमेन प्रसङ्गेऽस्मिन् कथितं यत् - ज्येष्ठपुत्रस्य औरसपुत्रस्यैव सर्वं पितृधनं भवतीति । अनेन- विभागाभावपक्षोऽपि तेनैव प्रदर्शितः । ज्येष्ठोऽपि अनुजान् भगिनीश्च पितृवत् पालयेदिति । अत्र - सति पितृधने, असति पितृधने वा स पूर्वजत्वेन पितृवत् पालयेत् । गौतमेन ''विभागे धर्मवृद्धिः'' इति सूत्रेण विभागस्य प्रशंसापि कृता ।

## सवर्णभ्रातृधनविभागः :-

भ्रातृणां विभागे गौतमेन ज्येष्ठभ्रातुवैशिष्ट्यं प्रदर्शितम् । अर्थात् - पिता यदा ज्येष्ठस्य विंशोद्धारादिकं कृत्वा विभजेदथवा - सर्वानेव समांशान् कुर्यात् । ज्येष्ठाय उद्धारव्यवस्थापि गौतमेन प्रतिपादिता । यथा - गवादिषु गोमिथुनम्, अथवा

अश्वादिभिः युक्तः रथः गोवृषश्च । मध्यमस्य कृते काणः, – वृद्धः शृङ्गविकलादयः पशवः, यदि – वहवः स्युः, तर्हि तत्र उद्धारः देयः । कनीयसः कृतेऽपि उद्धारव्यवस्था तेनैव – प्रकल्पिता । यथा – मेषः – एकोऽपि यदि स्यात् स कनिष्ठस्यैव भवति । तथा च गोमहिष्यादयः यदि बहवः स्युः तर्हि प्रतिपशु एकः उद्धारत्वेन प्रकल्पनीयः । ततः पितुः धनं समधा भजेरन् पुत्राः । अथवा ज्येष्ठः अंशद्वयं गृहीत्वा इतरेषाम् एकैकशं दद्यात् ।

अथवा भ्रातृषु पूर्वः पूर्वः धनानुरूपम् एकम् एकं कामानुरूपं वस्तु गृह्णीयात् । ततः अवशिष्टं धनं समधा विभज्य ग्रह्णीयुः । अत्रायं विभागस्य प्रकारभेदः गौतमेन कथितः । असवर्णभ्रातृणां विभागे ज्येष्ठो भ्राता यदि ज्येष्ठायाः पुत्रो न भवति, तर्हि एकः वृषः तस्य कृते उद्धारः देयः । अन्यत् सर्वं समम् । अज्येष्ठायाः पुत्रः चेत् ज्येष्ठः, तदा समविभागः विहितः ।

पुत्रिकापुत्रग्रहणप्रसङ्गेऽपि पिता प्रजापतिदेवतोद्देश्येन यागं कृत्वा निर्णयं कुर्यात्। यत् कन्याया अपत्यम् मदुपकारकं भवेदिति । एकेषाम् आचार्याणां मते पितुः इच्छामात्रेण पुत्रिका भवतीति ।

कन्यापिता कन्यायाः विवाहकाले यदि मनसि चिन्तयेत् यत् अस्याः पुत्रः मदुपकारकः भविष्यतीति, तदा अभिसन्धिः अन्यैः न ज्ञातुं शक्यते, अतः अभ्रातृकां नोपयच्छेदिति वचनं विद्यते ।

| **बोधप्रश्नाः** |
| --- |
| १. पितुरिच्छया विभागो भवति न वा ? |
| |
| |
| २. भ्रातृणां विभागे कस्य वैशिष्ट्यम् ? |
| |
| |
| ३. पितृधनविभागस्य कति कालाः ? |
| |
| |

## अपुत्रधनविभागक्रमः

गौतमेन अपुत्रधनविभागविवेचनप्रसंगे कथितम् यत् – पुत्राभावे पुत्रिकाभावे च यथाक्रमं पिण्डसम्बन्धाः गोत्रसम्वन्धाः समानप्रवराः अनपत्यस्य रिक्थं भजेरन् । तैः सह अनपत्यस्य स्त्री ग्रासाच्छादनरूपं दायं गृह्णीयात् । वस्तुतः आत्मनः पुत्रपौत्रप्रपौत्रतत्पुत्रादिषु सत्सु भ्रात्रादयः सपिण्डाः न दायं लब्धुमर्हाः । प्रसंगेऽस्मिन् गौतमेन अनपत्यस्य स्त्री देवरात् पुत्रमिच्छेदिति उक्तम् । यदि देवरभिन्नात् पुरुषात् पुत्रं जातम् तर्हि राजा तं भागहीनं कुर्यादिति प्रोक्तम् । एवमेव अपुत्रधनविभागः संक्षेपेण प्रतिपादितः ।

**स्त्रीधनम्** –

स्त्रीधनं न स्त्रिया धनम्, अपि तु ''स्त्री स्वाभिकं धनम्'' स्त्रीधनं पारिभाषिकम्, मनुना प्रसंगेऽस्मिन् कथितम् यत् – ''अध्यग्नि–अध्यवाहनिकं दत्तं च प्रीतिकर्मणि । भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम् ।'' अत एव स्त्रीधनं षड्विधमिति न्यूनसंख्यानिवारणार्थं ज्ञायते । तत्र मातरि मृतायां प्रथमं स्त्रीधनं दुहितॄणामेव भवति । दुहितृषु अप्रत्तानाम् अर्थात् अकृतविवाहानामेव भवति । यतः तासां जीवनार्थं विवाहार्थं च धनस्यावश्यता विद्यते । अतः तासामेव धनग्रहणमुचितमिति प्रतिभाति । परन्तु यदि सर्वा दुहितरः विवाहिताः, तर्हि सर्वा दुहितरः विवाहिताः, तर्हि तासु विवाहितासु अप्रतिष्ठितानाम् अधिकारः कथितः । तत्र अप्रतिष्ठिता अपुत्रा निर्द्धना वेति विवदन्ति । परन्तु धनग्रहणविषयत्वात् निर्धना इति पक्षः सूक्ष्माटीकाकारेण युक्तिसम्मतः इति कथितम् । अत एव निर्धनानां दुहितॄणामभावे सधना गृह्णीयुरिति क्रमः प्रदर्शितः । परन्तु जीमूतवाहनेन ''प्रतिष्ठिता सपुत्रा'' इति स्वीकृत्य सपुत्राणां सम्भावित–पुत्राणामधिकारः अपुत्रेषु बन्ध्याविधवादिषु दुहितृषु अप्रतिष्ठासु सति यत् दर्शितम्, तत् मुनिवचनविरुद्धमिति सूक्ष्माटीकाकारेण प्रतिपादितम् । यतः धनिन्याः पुत्रवत्याः पुत्रवत्याः निर्द्धनायाश्च अपुत्रायाः दुहित्रोः समवाये तन्मातुः कृपाकटाक्षः निर्द्धनाया उपति आपतत्येव । कदाचिदपि माता स्वप्रसूतिम् अनाहारक्लिष्टां द्रष्टुं समर्थान भवति ।

भगिनीशुल्कविचारदशायां गौतमेन कथितम् । यत् – भगिनीशुल्कं भगिन्या आसुरादिविवाहात् लब्धं शुल्कं मातरि जीवन्त्यां मातुरेव भवति । मातरि मृतायां सहोदरभ्रातॄणां भवति, प्रसंगेऽस्मिन् जीवन्त्यामपि मातरि सोदर्याणामिति केचन मतमुपस्थापयन्ति । वस्तुतः कन्यादाने कुटुम्बभरणे च यः अधिकारी स एव धनं गृह्णीयात् ।

| बोधप्रश्नाः |
|---|
| १. स्त्रीधनशब्दो यौगिकः पारिभाषिको वा ? |
| |
| |
| २. मातरि भृतायां स्त्रीधनं केषामधिकारः ? |
| |
| |
| ३. का अप्रतिष्ठिता इति कथ्यते ? |
| |
| |

## असंसृष्टिविभागः संसृष्टिविभागाश्च –

विभक्ता भ्रातरः असंसृष्टिनः इति कथ्यन्ते । तेषां यो वैयक्तिकः भागः स असंसृष्टिविभागः । मृतानाम् अदायदानां यः असंसृष्टिविभागः स ज्येष्ठस्य भ्रातुरिति गौतमधर्मसूत्रानुसारं ज्ञायते ।

## संसृष्टिविभागः

विभक्तो भ्रातादिः यदि पुनर्मिश्रितो भवति तदा स संसृष्ट इति कथ्यते । यथोक्तं बृहस्पतिना – विभक्तो यः पुनः पित्रा मात्रा वैकत्र संवसेत् । पितृव्येणाथवा प्रीत्या स तत् संसृष्ट उच्यते ।'' अनेन ज्ञायते यत् त्रिषु स्थानेषु संसृष्टित्वमिति । तत्र एकस्मिन् संसृष्टिनि मरणे जाते मृतस्य धनं संसृष्टिनः गृह्णन्ति । न तु असंसृष्टिनः गृह्णन्ति । अत एवोक्तं यत् – संसृष्टिनि प्रेते संसृष्टी रिक्थभाक् इति । अत्र परलोकप्राप्तस्य भार्यायां विद्यमानायामपि संसृष्टी भ्राता रिक्थभाक् भवतीति मिताक्षराकारेण विज्ञानश्वरेण कथितम् । भार्याया अभावे भ्रातेति जीमूतवाहनेन कथितम् ।

| बोधप्रश्नाः |
|---|
| १. कः असंसृष्टीति कथ्यते ? |
| |
| |
| २. कः संसृष्टि – इति उच्यते ? |
| |

| |
|---|
| ३. संसृष्टिनि प्रेते कः रिक्थभाक् भवति ? |
| |
| |

## विभक्तजानां विभागः

विभक्तेषु पुत्रेषु पश्चात् जातः विभक्तजः, विभक्तजः पुत्रः पित्रा विभागकाले यद् गृहीतं यच्च विभागानन्तरं स्वयमर्जितं तत् सर्वम् अल्पं बहु वा गृह्णीयात् । परन्तु अत्रेदमपि विवेचनीयं यत् ''निवृत्ते रजसि मातुः'' इति वचनेन मातुः प्रसवसम्भावनाभावात् नूतनतया गृहीतायां भार्यायां जात वा इति । तत्रापि इदमपि भवितुमर्हति । विषयेऽस्मिन् विज्ञानेश्वर - जीमूतवाहनयोः मतमपि परस्परं भिद्यते ।

वैद्यावैद्यानां भ्रातृणां विभागे विद्वान् स्वयमर्जितं धनं मूर्खेभ्यः कामं न दद्यात्, अपि तु दानेच्छायां सत्यां दद्यात् । दानेच्छायामसत्यां न दद्यात् । अवैद्या भ्रातरः समं विभागं कुर्युः । न तत्र ज्येष्ठकनिष्ठभागनियमः ।

**पुत्राः -**

गौतमेन पुत्रा द्वादशविधा इति स्वीकृतम् । एतेषु पुत्रेषु औरस-क्षेत्रज-दत्त-कुत्रिम-गूढोत्पन्न-अपविद्धाः षट् रिक्थभाजः । रिक्थभाजः भवन्ति कथनात् गोत्रभाजः न भवन्तीति चिन्तनीयम् । गोत्रभाजश्च सुतरां भवन्ति । कामीनः - सहोढः पौनर्भवः पुत्रिकापुत्रः स्वयंदत्त - क्रीतश्च षट्पुत्राः रिक्थभाजो न भवन्ति । केवलं गोत्रभाज एव भवन्ति । गोत्रभाक्त्वेन जन्ममरणयोरशौचसम्बन्धिनो भवन्ति । मनुना प्रसंगेऽस्मिन् औरसादयो दायदबान्धवा कानीनादय अदायादवान्धवाः इति प्रतिपादितम् ।

औरसादीनां षण्णामभावे एते कानीनादयः षट्पुत्राः चतुर्थांशिनो भवन्ति । अर्थात् पितृधनस्य चतुर्थभागभाजो भवन्ति । अन्यद् अवशिष्टं भागत्रयं दायदाः गृह्णीयुः।

एकस्य ब्राह्मणस्य पितुः क्षत्रियापुत्र - ब्राह्मणीपुत्रयोर्मध्ये अर्थात् - क्षत्रियायाः पुत्रः ब्राह्मणीपुत्रापेक्षया यदि ज्येष्ठो गुणसम्पन्नो, तर्हि तुल्यभाक् भवति । अत्र एको वयसा ज्येष्ठः अपरः जात्या ज्येष्ठ इति द्वयोः समता । एवमेव गौतमेन ब्राह्मणेन उत्पादितयोः राजन्यवैश्यापुत्रयोः वयसा न्यूनस्य राजन्यापुत्रस्य गुणेन वयसा च ज्येष्ठस्य वैश्यापुत्रस्य च समवाये गुणवयोज्येष्ठः वैश्यापुत्रः क्षत्रियापुत्रेण सह तल्पभाक् भवति

इति प्रतिपादितम् । जडस्य पुत्रो भागार्हो भवति, प्रतिलोमजाः ग्रासाच्छादनमात्रं लब्धुमर्हन्ति । प्रसंगेऽस्मिन् संक्षेपेण इदमपि तेनैव कथितं यत् कूप देवालयादीनां विभागो नास्ति । धर्मशास्त्रे अनादिष्टेषु विषयेषु सन्देहस्थलेषु च दशावराः शिष्टाः प्रमाणभूताः भवन्ति । के दशावदराः शिष्टाः इति चेत् – चतुर्षु वेदेषु षडंगेषु मनुगौतमादि–धर्मशास्त्रेषु च निष्णातः तदाचरणशीलः शिष्टः इति । तैः यदुच्यते स धर्मः । एवमेव धर्ममार्गानुसारणेन स्वर्गलोकप्राप्तिः भवतीति प्रतिपादितम् ।

| **बोधप्रश्नाः** |
|---|
| १. पुत्राः कदा रिक्थं भजेरन् ? |
| |
| |
| २. पुत्राः कतिविधाः ? |
| |
| |
| ३. के रिक्थभाजः ? |
| |
| |
| ४. स्त्रीधनं कतिविधम् ? |
| |
| |

## सारांशः

प्रियपाठकाः ! अस्मिन् खण्डे सुराशब्दस्यार्थं सुरापानप्रायश्चित्तं च प्रतिपाद्य तत्र अमेध्यादिद्रव्याणां प्राशने किं कर्त्तव्यमिति आलोचितम् । ततः गुरुतल्पगमनप्रायश्चित्तरूपेण प्रसङ्गे तत्समानपातकानामपि प्रायश्चित्तं विचारितम् । तदनु रहस्यप्रायश्चित्तविचारप्रसङ्गे किं नाम रहस्यमिति प्रतिपाद्य तत् प्रायश्चित्तं

निरूपितम् । ततः कः अवकीर्णित प्रतिपाद्य तत् प्रायश्चित्तमपि विचारितम् । तथा च कृच्छ्र-अतिकृच्छ्र-कृच्छ्रातिकृच्छ्राणां स्वरुपं प्रतिपाद्य चान्द्रायणव्रतं निरुपितम् । ततः पितुः धनविभागकालः अपुत्रधनविभागक्रमः रिक्थभाजः गोत्रभाजश्च प्रतिपादिताः सन्ति ।

## पारिभाषिकशब्दाः -

तप्तकृच्छ्रः - व्रतविशेषः

तत्स्वरूपम् - तप्तक्षीरघृताम्बूनामेकैकं प्रत्यहं पिवेत्
एकरात्रोपवासश्च तप्तकृच्छ्र उदाहृतः

तपः - शरीरं प्रति क्लेशप्रदानम्

गुरुतल्पगः - गुरुपत्नीगामी

सूर्मी - लोहमयीस्त्रीप्रतिकृतः

अवकरः - दोषः, अमेध्यस्थानमिति-हरदत्तः

अवकीर्णः - व्रतभ्रष्टब्रह्मचारी

आक्राशः - विरुद्धबुद्ध्या उच्चैर्भाषणम्

अनार्जवम् - कुटिलता

अपविद्धः - पितृभ्यां परित्यक्तः

अयाचितम् - व्रतविशेषः (अप्रयत्नलब्धं परदत्तम्)

असंसृष्टी - विभक्तभ्राता

कृच्छ्रः - प्राजापत्यव्रतम्
त्र्यहं प्रात-स्त्र्यहं सायं त्र्यहमद्यादयाचितम्
त्र्यहं परं च नाश्नीयात् प्राजापत्यं चरन् द्विजः ।

रिक्थम् - अप्रतिबन्धोदायः

स्त्रीधनं - स्त्रीस्वामिकं धनम्

क्षेत्रजः - क्लीवादीनां क्षेत्रे पत्युराक्षया, मृतानां क्षेत्रे श्वशुरादिगुरुणामाज्ञया देवरादिभ्यो विधानमपुसृत्य जातः ।

## आदर्शप्रश्नाः -

**निबन्धात्मकप्रश्नाः** - (प्रत्येकं २०/१५ अङ्काः)

१. का नाम सुरा इति विलिख्य सुरापानप्रायश्चित्तं प्रतिपादयत ।

२. गुरुतल्पगमनप्रायश्चित्तं यथाग्रन्थं विमृशत ।

३. गौतमोक्तदिशा रहस्यप्रायश्चित्तं विवेचयत ।

४. चान्द्रायणव्रतं यथाग्रन्थं प्रतिपादयत ।

५. धनविभागकालान् विवेचयत ।

६. अपुत्रधनविभागक्रमं निरूपयत ।

७. स्त्रीधनस्वरूपं विलिख्य स्त्रीधनविभागक्रमं प्रदर्शयत ।

**विश्लेषणात्मकप्रश्नाः** - (प्रत्येकं १२/१० अङ्काः)

१. सुराशब्दस्यार्थं तद्भेदान् च प्रदर्शयत ।

२. अमेध्यादिप्राशने प्रायश्चित्तं निरूपयत ।

३. उपपातके अवकीर्णिप्रायश्चित्तं विमृशत ।

४. भ्रूणबधे रहस्यप्रायश्चित्तं प्रतिपादयत ।

५. प्राजापत्यव्रतस्वरूपं निरूपयत ।

६. कृच्छ्रातिकृच्छ्रव्रतं निर्दिशत ।

७. पिपिलिकामध्यचान्द्रायणं प्रतिपादयत ।

८. पुत्रेषु के रिक्थभाजः इति निरूपयत ।

**लघुप्रश्नाः** - (प्रत्येकं ५ अङ्काः)

टिप्पणी प्रदेया -

१.अवकीर्णी, २.रहस्यप्रायश्चित्तम्, ३.अभक्ष्यभक्षणे रहस्यप्रायश्चित्तम्, ४.अनार्जवादिषु प्रायश्चित्तम्, ५.ब्राह्मणबधे रहस्यप्रायश्चित्तम्, ६.कृच्छ्रः, ७.शिशुचान्द्रायणम्, ८.भ्रातृणां धनविभागः, ९.रिक्थभाजः, १०.गोत्रभाजः, ११.पुत्राः, १२.स्त्रीधनम् ।

**एकाङ्कप्रश्नाः** - (प्रत्येकं १ अङ्कः)

१. सुरासु का मुख्या ?

२. अमत्या सुरापाने शुद्ध्यर्थं किं कुर्यात् ?

३. तल्पशब्दस्य कोऽर्थः ?

४. ग्राम्यसूकरमांसभक्षणप्रायश्चित्तं किम् ?

५. ग्राम्यशूकरैः दष्टः केन शुद्ध्यति ?
६. किं नाम रहस्यम् ?
७. किं नाम अनार्जवम् ?
८. कति व्याहृतयः ?
९. सुरापस्य गन्धाघ्राणे शुद्ध्यर्थं किं कुर्यात् ?
१०. का सूर्मी इति कथ्यते ?
११. उष्ट्रक्षीरपाने किमात्मकं प्रायश्चित्तम् ?
१२. किं नाम रिक्थम् ?
१३. किं नाम कृच्छ्रम् ?
१४. प्राजापत्यं कति दिवासात्मकम् ?
१५. किं नाम अयाचितम् ?
१६. चान्द्रायणव्रते कस्योपस्थानं भवति ?
१७. किं नाम त्रिषवणस्नानम् ?
१८. कस्मिन् व्रते वपनमादौ कर्त्तव्यम् ?
१९. पुत्राः रिक्थं कदा भजेरन् ?
२०. स्त्रीधनं कतिविधम् ?
२१. पुत्रः कतिविधः ?
२२. स्त्रीधनशब्दो यौगिकः परिभाषिको वा ?

**एकाङ्कप्रश्नानामुत्तराणि** - १. पैष्टी, २. तप्रकृच्छ्रं, पुनरूपनयनं च, ३. शय्या, ४. तप्तकृच्छ्रं पुभरूपनयनञ्च, ५. प्राणायामेन घृतप्राशने च, ६. रहसिभवम् गोपनीयम्, ७. कुटिलता, ८. पञ्च, ९. प्राणायामान् घृतप्राशनञ्च, १०. लोहमयी स्त्रीप्रतिकृतिः सूर्मी, ११. तप्तकृच्छ्रं पुनरूपनयनञ्च, १२. अप्रतिबन्धोदायः, १३. प्राजापत्यम्, १४. द्वादश, १५. कंचन कांचन वा न याचेत्, अर्थात् अयाचितभावेन यत् लभ्यते, १६. चन्द्रस्य, १७. प्रातः मध्याह्न-सायं सन्ध्यासु स्नानम्, १८. चान्द्रायणे, १९. पितुः उर्ध्वम्, मातुः निवृत्तरजकायां, पितुरिच्छया च ।, २०. षड्विधम्, २१. द्वादशविधः, २२. पारिभाषिकः ।

❖❖❖